साहित्यदर्पणम्

~~[illegible]~~

२५२

[illegible]
साहित्यदर्पणः
पुस्तककारो
(अपूर्ण)
[illegible]
श्लो-
विश्वनाथकविराज
[illegible]

साहित्यदर्पणात् परिच्छेदत्रयं ॥

श्लो १३००

॥ श्रीगणेशाय नमः॥ ग्रंथारंभे निर्विघ्नेन परीक्षितसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः सांमु
ख्यमाधत्ते॥ शरदिंदुसुंदररुचिश्चेतसि सा मे गिरां देवी॥ अपहृत्य तमः संततमर्थानखिलान्प्रका
शयतु॥१॥ अस्य ग्रंथस्य काव्यांगतया काव्यफलैरेव फलवत्त्वमिति काव्यफलमाह॥ चतुर्वर्गफ-
लप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥२॥ चतुर्वर्गफल
प्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युप
देशद्वारेण सुप्रतीतैव॥ उक्तं च॥ धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च॥ करोति कीर्ति-
प्रीतिं च साधुकाव्यनिषेवणमिति॥ किंच काव्याद्धर्मप्राप्तिर्भगवन्नारायणस्तवनादिना। एकः
शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवतीत्यादिवाक्येभ्यः सुप्रसिद्धैव॥ अर्थप्राप्तिः

प्रत्यक्षसिद्ध॥ कामप्राप्तिश्चार्थद्वारेव॥ मोक्षप्राप्तिश्चैतज्जन्यफलाननुसंधानात्॥ मोक्षोपयोगियाक्ये
श्रुत्पत्त्याधायकत्वाच्च॥ चतुर्वर्गप्राप्तिर्हि वेदादिशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामे
व जायते॥ परमानंदसंदोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव॥ ननु तर्हि
परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु काव्ये किमिति यत्नः करणीयमित्यपि न वक्तव्यं॥ कटुकौषधोप
शमनीयस्य रोगस्य सितशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्॥ [illegible]॥
किंच॥ काव्यस्योपादेयत्वमाग्नेयपुराणेप्युक्तं॥ नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा॥ कवित्वं दुर्लभं
तत्र शक्तिस्तत्र सुदुर्लभा॥ ३॥ त्रिवर्गसाधनं नाट्यमिति॥ विष्णुपुराणे च॥ काव्यालापाश्च ये केचिद्गी
तकान्यखिलानि च॥ शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥ इति॥ तेन हेतुना काव्यस्य स्वरूपं नि
रूप्यते॥ एतेनाभिधेयं च दर्शितं॥ तत्र किं तावत्काव्यमित्यपेक्षायां कश्चिदाह॥ तददोषौ शब्दार्थौ

३ नाद्यं हि द्विविधं श्राव्यं दृश्यं च॥ तत्र श्राव्यं रघुरामायणादि दृश्यं नाटकादि॥

सगुणावमलंकृतौ पुनः क्वापि त्वेतदाहतश्चिंत्यं। तथाहि। यदि दोषरहितस्यैव काव्यत्वं गीकारस्तदा न्यक्कारो
ह्ययमेव ममेय दरयस्तत्राप्यसौ तापसः सोप्यत्रैव निहंति राक्षसगणान् जीवत्यहो रावणः॥ धिक् धिक् शक्र
२ जितं प्रबोधितवता किं कुंभकर्णेन [illegible]स्वर्गग्रामटिकाविलुंठनवृथोच्छूनैः किमेभिर्भुजैः॥२॥ अस्य श्लो
कस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात्। इत्युत ध्वनित्वेनोत्तमकाव्यतास्यांगीकृता [illegible]
॥ तेनाव्याप्तिर्लक्षणदोषः। ननु कश्चिदेवांशोऽत्र दुष्टो न पुनः सर्वोपीति चेत्तर्हि यत्रांशे दोषः सोऽकाव्य
[illegible]त्वप्रयोजको यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयत आकृष्यमाणमिदं काव्यम
काव्यं वा किमपि न स्यात्। न च कंचिदेवांशं काव्यस्य दूषयंतः श्रुतिदुष्टादयो दोषाः किं तर्हि सर्वमे
व काव्यं। तथाहि काव्या[illegible]भूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नांगीक्रियते। अन्य
था नित्यदोषानित्यदोषव्यवस्थापि न स्यात्। यदुक्तं ध्वनिकृता। श्रुतिदुष्टादयो दोषा अनित्या २
ये च दर्शिताः॥ ध्वन्यात्मन्येव शृंगारे ते हेया इत्युदाहृताः॥ किंचैवं काव्यं प्रविरलविषयं निर्विषयं वा

स्यात्। सर्वथा निर्दोषस्यैकांतमसंभवात्। नन्वीषदर्थे नञ्प्रयोग इति चेत्तर्हि ईषद्दोषौ शब्दार्थौ काव्यमित्यु
क्ते निर्दोषयोः काव्यत्वं न स्यात्। सति संभवे ईषद्दोषाविति चेत् एतदपि काव्यलक्षणे न वाच्यं। रत्नादि
लक्षणे कीटानुवेधपरिहारादिवत्। न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहंतुमीशाः। किंतूपादेयत
तारतम्यमेव कर्तुं। तद्वदत्रापि श्रुतिदुष्टादयः काव्यस्य। उक्तं च। कीटानुविद्धरत्नादिसाधारण्येन
काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥ इति। किंच शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नं। गुणा
नां रसैकधर्मत्वस्य ये रसस्यांगिनो धर्माः शौर्यादय इवात्मन इत्यादिना तेनैव प्रतिपादितत्वात्। रसा
भिव्यंजकत्वेनोपचारत उपपद्यत इति चेत्। तथाप्ययुक्तं। तथा हि तयोः काव्यत्वेनाभिमतयोः शब्दा
र्थयो रसोऽस्ति न वा। नास्ति चेद्गुणवत्त्वमपि नास्ति॥ गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अ
स्ति चेत्कथं नोक्तं रसवंताविति विशेषणं। गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यत इति चेत्। तर्हि सर
सावित्येव वक्तुं युक्तं न सगुणावि

त्तिानहि प्राणिमंतोदेशाद्वृत्तिवत्त्वव्येशौर्यादिमंतोदेशाद्वृत्तिवेत्राप्नुव्यते। ननु शब्दार्थौ सगुणावित्यनेन-
३ गुणाभिव्यंजकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्रायइति चेन्न। गुणाभिव्यंजकशब्दार्थवत्त्वस्यापिका
व्ये उत्कर्षाधायकत्वे न तु स्वरूपाधायकत्वं। उक्तं हि। काव्यस्य रसादिरूपात्मनो गुणाः शौर्यादिवद्दोषाः
काणत्वादिवत्त्वरीतयो वयवसंस्थानवत्। अलंकाराः कुंडलादिवदिति। एतेनानलंकृती पुनः क्वापी
तियदुक्तं तदपि परास्तं। अस्यार्थः। सर्वत्र सालंकारौ क्वचिदस्फुटालंकारौ अपि शब्दार्थौ काव्यमि
ति। सालंकारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात्। एतेन वक्रोक्तिः काव्यजीवितमिति व
क्रोक्तिजीवितकारोक्तमपि परास्तं। वक्रोक्तेरलंकाररूपत्वात्। यत्तु क्वचिदस्फुटालंकारत्वे उदा
हृतं। यः कौमारहरः स एव च करस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानि ३
लाः। सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समु

त्कंठते। एतद्भिन्नं। अत्र हि भावस्याविशेषो किंमूलस्य संदेहसंकरालंकारस्फुटत्वं। एतेन। अदोषं तु गुण
वत्काव्यमलंकारैरलंकृतं। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विंदति। इत्यादीनामपि काव्य
लक्षणानामपास्तं। यत्तु ध्वनिकारेणाप्युक्तं। काव्यस्यात्मा ध्वनिरिति। तत्किं वस्त्वलंकार
रसादिलक्षणस्त्रिविधो ध्वनिः काव्यस्यात्मा उत रसादिरूपमात्रो वा। नाद्यः प्रहेलिकाद
वतिव्याप्तेः। द्वितीयश्चेदिति ब्रूमः। ननु यदि रसादिमात्ररूपध्वनिः काव्यस्यात्मा तदा। अ
त्ता एत्थ णिमज्जइ एत्थ अहं दिवसए पलोएहि। मा पहिअ रत्तिअंधअ मह सेज्जाए णि
मज्जहिसि॥ इत्यादौ वस्तुमात्रव्यंजकत्वेन कथं काव्यव्यवहार इति चेत्। अत्रापि रसाभासवत्त्वे
नैवेति ब्रूमः। अन्यथा देवदत्तो ग्रामं गच्छतीति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यंग्याव

गतेरपि काव्यत्वं स्यात्। अस्त्विति चेन्नारसवत एव काव्यत्वांगीकारात्। काव्यप्रयोजने हि रसा
स्वादसुरसपिंडद्वारेण वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रप्रभृतीनां विनेयानां रामादिवत्प्र
५ वर्तितव्यं न रावणादिवदित्यादि कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरंतनैरप्युक्तत्वात्। तथा
चाग्निपुराणे। वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितमिति। व्यक्तिविवेककारेणाप्युक्तं। वाच्यस्या
त्मनि संज्ञिनि रसादिरूपेण कस्यचिद्विमतिरिति। ध्वनिकारेणाप्युक्तं। न हि कवेरितिवृत्तमात्रनिर्वाहे
णात्मलाभ इति हासादेवत[illegible]दिशौत्यादिना ननु तर्हि प्रबंधांतर्वर्तिनां केषांचित्पद्यानां नीरसा
नां काव्यत्वं न स्यात्। इति चेन्नारसवत्पद्यानां नीरसपदानामिव पद्यरसेन प्रबंधरसेनैव तेषां रसवत्तां
गीकारात्। यत्तु नीरसेष्वपि गुणाभिव्यंजकसद्भावाद्दोषाभावादलंकारसद्भावाच्च काव्यव्यवहारः। सरस
वत्काव्यबंधसामान्यात्। एवापि च तु वामनेनोक्तं रीतिरात्मा काव्यस्येति। तन्नारीतेः संघटनाविशेष

त्वात्संघटनायाश्चावयवसंस्थानरूपत्वात्। आत्मनैश्चेतन्यद्भिन्नत्वात्। यच्च ध्वनिकारेणोक्तं। अर्थः सहृदयश्लाघ्य
काव्यात्मा यो व्यवस्थितः। वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृताविति। तत्र वाच्यस्यात्मत्वं काव्यस्या
त्मा ध्वनिरित्यादिस्ववचनविरोधादेवापास्तं। न हि। किं पुनः काव्यमित्युच्यते। वाक्यं रसात्मकं काव्यं। र
सस्वरूपं निरूपयिष्यामः। रस एवात्मा साररूपतया जीवनाधायको यस्य। तेन विना तस्य काव्यत्वाभावस्य
प्रतिपादितत्वात्। रस्यत इति रस इति व्युत्पत्तियोगाद्भावतदाभासादयोपि गृह्यन्ते। तत्र रसो यथा। शू
न्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं।
विस्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबि
ता। अत्र संभोगशृंगाराख्यो रसः। भावो यथा। महापात्रराघवानंदसांधिविग्रहिकाणां। यस्या
लीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मंडलं दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलंबासुरो ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै

रवक्रो १

नमः। अत्र भगवद्विषया रतिर्भावः। रसाभासो यथा। मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्त
5 मानः। शृंगेन च स्पर्शनिमीलिताक्षीं मृगीमकंडूयत कृष्णसारः। अत्र संभोगशृंगारस्य तिर्यग्वि
षयत्वाद्रसाभासः। एवमन्यत्। दोषाः पुनः काव्ये किं स्वरूपा इत्युच्यंते। दोषास्तस्यापकर्षकाः।
श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखंजत्वादय इव देहद्वारेणाव्यभिचारिभावादेः स्वशब्दवाच्यता
व्य दयो मूर्खत्वादय इव साक्षात्काव्यस्यात्मभूतं रसमपकर्षयंतः काव्यस्यापकर्षका इत्युच्यंते। एषां विशे
षोदाहरणानि वक्ष्यामः। गुणादयः किं स्वरूपा इत्युच्यते। उत्कर्षहेतवः प्रोक्ता गुणालंकाररीतयः। गुणाः शौर्यादि
वत्। अलंकाराः कटककुंडलादिवत्। रीतयो अवयवसंस्थानविशेषवत्। देहद्वारेणेव शब्दार्थद्वारेण तस्यैव काव्या ५
त्मभूतं रसमुत्कर्षयंतः काव्यस्योत्कर्षका इत्युच्यंते। इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोत्र गुणाभिव्यं
जकशब्दार्थयोरुपचर्यते। अत एव गुणाभिव्यंजकाः शब्दा रसस्योत्कर्षका इत्युक्तं भवतीति प्रागेवोक्तं। एषामपि वि

दोषोदाहरणानि वक्ष्यामः॥१॥ इति श्रीमन्नारायणचरणारविंदमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थानपरमाचार्य
कविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजंगसांधिविग्रहमहापात्रश्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे का
व्यस्वरूपनिरूपणो नाम प्रथमः परिच्छेदः॥१॥ वाक्यस्वरूपमाह। वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः। योग्य
ता पदार्थानां परस्परसंबंधे बाधाभावः। पदोच्चयस्यैतदभावेपि वाक्यत्वे वह्निना सिंचतीत्यादावपि वाक्यं स्यात्। आकां
क्षा प्रतीतिपर्यवसानविरहः। स च श्रोतुर्जिज्ञासारूपः। निराकांक्षस्य वाक्यत्वे गौरश्वः पुरुषो हस्तीत्यापि वाक्यं स्यात्। आसत्ति
र्बुद्ध्यविच्छेदः। बुद्धिविच्छेदेपि वाक्यत्वे इदानीमुच्चारितस्य देवदत्तशब्दस्य दिनांतरोच्चारितेन गच्छतीतिप
देन संगतिः स्यात्। अत्राकांक्षायोग्यतयोरात्मार्थधर्मत्वेपि पदोच्चयधर्मत्वमुपचारात्। वाक्योच्चयो महावाक्यं। योग्य
ताकांक्षासत्तियुक्त इत्येव। इत्थं वाक्यं द्विधा मतं। इत्थमिति वाक्यं महावाक्यत्वेन उक्तमेव। स्याद्धर्वोधे समासानामं
गांगित्वाद्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति। तत्र वाक्यं यथा। शून्यं वासगृहमित्यादि। महावा
क्यं यथा। रामायणमहाभारतरघुवंशादि। पदोच्चयो वाक्यमित्युक्तं तत्किं पदलक्षणमित्यपेक्षायामाह। वर्णाः पद
प्रयोगार्हानन्वितैकार्थबोधकाः। यथा घटः। प्रयोगार्हेति प्रातिपदिकव्यवच्छेदः। अनन्वितेति वाक्यमहावाक्य

योः। एकेति साकांक्षानेकपदवाक्यानां। अर्थबोधका इति कचटतपेत्यादीनां वर्णा इति बहुवचनमविवक्षितं। तत्र अर्थो
वाच्यश्च लक्ष्यश्च व्यंग्यश्चेति त्रिधा मतः। एषां स्वरूपमाह। वाच्योर्थोभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यंग्यो व्यं
जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः। ताः अभिधाद्याः। तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा। उत्तमवृद्धेन मध्यम
वृद्धमुद्दिश्य गामानयेत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य बालोस्य वाक्यस्य सास्नादिमत्पिंडानयनमर्थ इति प्रथमं प्रति
6 पद्यते। अनंतरं च गां बधान अश्वमानयेत्यादावावापोद्वापाभ्यां गोशब्दस्य सास्नादिमानर्थः आनयेतिशब्दस्याहरणम
र्थ इति संकेतमवधारयति। क्वचित्प्रसिद्धपदसमभिव्याहारात् यथेह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्य
त्र। क्वचिदाप्तोपदेशात्। यथायमश्वशब्दवाच्य इत्यत्र। तं च संकेतितमर्थं बोधयंतीति शब्दस्य शक्त्यंतरानंत
रिता शक्तिरभिधा नाम। संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च। जातिर्गोपिंडादिषु गोत्वादिका। गुणो विशेषाधा
नहेतुः सिद्धो वस्तुधर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्तयंति। द्रव्यशब्दा ए ६
कव्यक्तिवाचिनः। हरिहरडित्थडवित्थादयः। क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः। एषु अधिश्रयणा
द्यवश्रयणांतादिः पूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः। एष्वेव हि व्यक्तेरुपाधिषु संकेतो गृह्यते न व्य
क्तौ। आनंत्यव्यभिचारदोषापातात्। अथ लक्षणा। मुख्यार्थबाधे तद्युक्तो ययान्योर्थः प्रतीयते। रूढे

प्रयोजनाद्यसौ लक्षणाशक्तिरर्पिता । कलिंगः साहसिक इत्यादौ कलिंगादिशब्दाद्देशविशेषादि
रूपस्यार्थेऽसंभवन् यथा शक्यास्य संयुक्तान् पुरुषादीन् प्रत्याययति । यथा च गंगायां घोष इ
त्यादौ गंगादिशब्दो जलमयादिरूपार्थवाचकत्वात् प्रकृतेऽसंभवन् स्वस्य सामीप्यादिसंबंधि
ने तटादि बोधयति । सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता या शक्तिः लक्षणा
नाम । पूर्वत्र हेतो रूढिः प्रसिद्धिरेव । उत्तरत्र गंगातटे घोष इति प्रतिपादनालभ्यस्य शीतत्वपा
वनातिशयस्य बोधनरूपं प्रयोजनं हेतुं विनापि यस्य कस्यचित् संबंधिनो लक्षणेति प्रसं
गस्यादित्युक्तं रूढेः प्रयोजनाद्वापीति । केचित्तु कर्मणि कुशल इति रूढावुदाहरंति । तेषा
मयमाशयः । कुशलानातीति व्युत्पत्तिलभ्यः कुशग्राहीरूपो मुख्योऽर्थः प्रकृतेऽसंभवन् विवेचक
त्वसाधर्म्यसंबंधसंबंधिनं दक्षरूपमर्थं बोधयतीति । तदन्येन मन्यते नो कुशग्राहिरूपार्थस्य

श्रुत्यन्तिलक्ष्य लेदस्य रूपस्यैव मुख्यार्थत्वात्। अन्यद्धि शब्दानां श्रुत्यात्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तं। कु
शलत्वे लक्ष्यस्य मुख्यार्थत्वे गौः शेते इत्यत्रापि लक्षणा स्यात्। गमेर्डोऽ इति गमेर्धातोर्डोप्रत्ययेन व्युत्पत्त्या
दितस्य गोशब्दस्य शयनकारिणि प्रयोगात्। इदं हेन्नाह। मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये। स्यादात्म
7 नोऽप्युपादानादेषोपादानलक्षणा। कुन्तावुपादानलक्षणा यथा। श्वेतो धावति प्रयोजने यथा कुन्ताः प्रविश
न्ति। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्चाचेतनत्वात् केवलैर्धावनप्रवेशनक्रियया न्वयमलभमानैरेतत्सिद्ध
ये आत्मसंबन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते। पूर्वत्र प्रयोजनाभावाद् रूढिः उत्तरत्र कुन्तादीनामतिगहन
त्वं प्रयोजनं। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानं लक्षणालक्षणायां तु परस्यैवोपलक्षणमित्यनयोर्भेद
रूपमेवाऽऽह स्वार्थे त्युच्यते। अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये। कालिंगगंगाशब्दावात्मानमर्पयतः ७
×उपलक्षणहेतुत्वादेषा लक्षणलक्षणा रूढिप्रयोजनयोर्लक्षणलक्षणा यथा। कलिंगः साहसिकः गङ्गायां घोष×
×इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये× यथा वा। उपकृतं बहु तत्र किमुच्यते सुजनता प्रथि
ता भवता परं। विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतं। अत्रापकारादीनां वाक्यार्थेऽन्वयसि

क्षेपे उपकृतादयः शब्दा आत्मानमर्पयन्ति। अपकारिणं प्रत्युपकृत्यादिप्रतिपादनान्मुख्यार्थबाधः। वैपरीत्यलक्षणः
संबंधः। फलमपकारातिशयः। इयमेव जहत्स्वार्थेत्युच्यते। आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा। ताः
पूर्वोक्ताः चतुर्भेदा लक्षणाः। विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्। सारोपा स्यान्निगीर्णस्य मता सा
ध्यवसानिका। रूढावुपादानलक्षणा सारोपा यथा। अश्वः श्वेतो धावति। अत्र हि श्वेतगुणवानश्वो निगीर्णः।
स्वरूपः स्वसमवेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा। एते कुन्ताः प्रविशन्ति। अत्र सर्वनाम्ना कुन्तधारिपुरु
षनिर्देशात् सारोपात्वं। रूढौ लक्षणलक्षणा सारोपा यथा। कलिंगः पुरुषो युध्यति। अत्र कलिंगपुरुषयोराधा
राधेयभावः संबंधः। प्रयोजने यथा। आयुर्घृतं। अत्रायुःकारणमपि घृतं कार्यकारणभावसंबंधेनायुस्ता
दात्म्येन प्रतीयते। अन्यवैलक्षण्येनाव्यभिचारेणायुःकरत्वं प्रयोजनं। यथा वा राजकीये पुरुषे गच्छति राजा
सौ गच्छतीति। अत्र स्वस्वामिभावलक्षणः संबंधः। यथा वा अग्रमात्रेऽवयवे हस्तोऽयं। अत्रावयवावयविभावल
क्षणः संबंधः। ब्राह्मणोऽपि तक्षासौ। अत्र तात्कर्म्यलक्षणः संबंधः। इन्द्रार्थासु स्थूणासु अमी इन्द्राः। अत्र ता
दर्थ्यलक्षणः संबंधः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत्साध्यवसाना। अत्र

स्याभ्यनुपुजे देषु एवौदाहरणान्येव साद्दश्येतरसंबंधाः शुद्धास्ताः सकला अपि। सादृश्यात्तु मता गौणी तेन षोडश
भेदिताः। ताः पूर्वोक्ता अष्टभेदा लक्षणाः। सादृश्येतरसंबंधाः कार्यकारणभावादयः। अत्र शुद्धानां पूर्वोदाहरणा
न्येव। रूढावुपादानलक्षणा सारोपा गौणी यथा। एतानि तैलानि हेमंते सुखानि। अत्र तैलशब्दस्तिलभवस्ने
हरूपमुख्यार्थमुपादायैव सार्षपादिषु स्नेहेषु वर्तते। प्रयोजने यथा। राजकुमारेषु तत्सदृशेषु वा गच्छत्सु एते राजकु
8 मारा गच्छंति। रूढावुपादानलक्षणा साध्यवसाना गौणी यथा। तैलानि हेमंते सुखानि। प्रयोजने यथा। राजकु
मारा गच्छंति। रूढौ लक्षणलक्षणा सारोपा गौणी यथा। राजा गौडेंद्रं कंटकं शोधयति। प्रयोजने यथा। गौ
र्वाहीकः। रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा। राजा कंटकं शोधयति। प्रयोजने यथा। गौर्जल्पति
अत्र केचिदाहुः। गोसहचारिणो गुणा जाड्यमांद्यादयो लक्ष्यंते। ते च गोशब्दस्य वाहीकार्थाभिधाननिमित्ता
भवंति। तदयुक्तं। गोशब्दस्यागृहीतसंकेतं वाहीकार्थमभिधातुमसामर्थ्यात्। गोशब्दार्थमात्रबोधनाच्चा
भिधाया विरतत्वात्। विरतायाश्च पुनरुत्थानाभावात्। अन्येन पुनर्गोशब्देन वाहीकार्थो नाभिधीयते। किंतु
स्वार्थसहचारिगुणसाजात्येन वाहीकगता गुणा एव लक्ष्यंते। तदप्यन्ये न मन्यंते। तथाह्यत्र गोशब्दाद्वाही

कार्यः प्रतीयते न वा। अत्रोच्यते गोशब्दादेव वा। लक्षिताद्वा गुणादविनाभावद्वारा। तत्र न प्रथमः। वाहीकार्थस्या
संकेतितत्वात्। न द्वितीयः। यदि गोशब्दाद्वाहीकार्थो न प्रतीयते तदास्य गोशब्दस्य च सामानाधिकरण्यमसमंजसं स्या
त्। तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसंबंधाद्वाहीका
र्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनं। इयं गुणयोगाद्गौणीत्युच्यते। पूर्वत्र तूपचारेणामि
श्रत्वाच्छुद्धा। उपचारो हि नामात्यंतं विसंकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रं। यथाग्नि
माणवकयोः। शुक्लपटयोस्तु नात्यंतं भेदप्रतीतिस्तस्मादेवमादिषु शुद्धैव लक्षणा। व्यंग्यस्य गूढागूढत्वा
द्द्विधा स्युः शुद्धलक्षणाः। प्रयोजने या अत्र भेदेन लक्षणा दर्शितास्ताः प्रयोजनरूपव्यंग्यस्य गूढागूढत
या प्रत्येकं द्विधा भूत्वा षोडश भेदाः। तत्र गूढो वाक्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः। यथा।
उपकृतं बहु तत्रेति। अगूढोऽतिस्पष्टतया सर्वजनवेद्यः। यथा श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञा वि
दग्धचरितानां। उपदिशति कामिनीनां यौवनमद एव ललितानि। अत्रोपदिशतीत्यनेनाविःकरोतीति लक्ष्यते
आविःकरणातिशयश्चाभिधेयवत्स्फुटं प्रतीयते। धर्मधर्मिगतत्वेन फलस्यैता अपि द्विधा। एताः अनंतरोक्ताः

षोडशभेदलक्षणाः। फलस्य धर्मिगतत्वेन धर्मगतत्वेन च प्रत्येकं द्विधा। तत्र द्वात्रिंशद्भेदाः। क्रमेणोदाहरति।
स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः। कामं
६७३ सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥ अत्रात्यन्तदुःखसहिष्णुरूपे
धर्मिणि धर्मिणि लक्ष्ये तस्यैवातिशयः फले। गङ्गायां घोषः। अत्र तटादिषु लक्ष्येषु शीतत्वपावनत्वाद्यतिशयस्य
१ धर्मस्यातिशयः फलं। तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः। रूढावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः। किं च पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा। ताः अनन्तरोक्ताः। तत्र पदगतत्वे यथा गङ्गायां घोषः। वाक्यगतत्वे यथा उपकृतं बहु तत्रेति। एवमशीतिप्रकारा लक्षणा॥॥ अथ व्यञ्जना। विरतास्वभिधाद्यासु यया्र्थो बोध्यते परः। सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च। शब्दबुद्धिकर्मणां विरम्य व्यापाराभावदर्
तिनये नाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु यया न्यार्थो बोध्यते ९
सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। तत्र अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा। अभिधामूलामाह। अनेकार्थस्य शब्दस्य संयोग

योर्नियंत्रिते। एकत्रार्थेऽन्यधीहेतुर्व्यंजना साभिधाश्रया। आद्यशब्दाद्विप्रयोगादयः। उक्तं हि। संयोगो विप्रयोगश्च साहच
र्यं विरोधिता। अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य संनिधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थ
स्यानवच्छेदे विशेषस्मृतिहेतवः इति। सशंखचक्रो हरिरित्यत्र शंखचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। अ
शंखचक्रो हरिरिति तद्वियोगेन तमेव। भीमार्जुनावित्यर्जुनः पार्थः। कर्णार्जुनाविति कर्णः सूतपुत्रः। स्थाणुं वं
दे इति स्थाणुः शिवः। सर्वं जानाति देव इति देवो भगवान्। कुपितो मकरध्वज इति मकरध्वजः कामः। देवः पुरारातिरि
ति त्रिपुरारातिः शिवः। मधुना मत्तः कोकिल इति मधुर्वसंतः। पातु वो दयितामुखमिति सांमुख्यं। भाति गगने चंद्र
इति चंद्रः शशी। निशि चित्रभानुरिति चित्रभानुरग्निः। भाति रथांगमिति नपुंसकव्यक्त्या रथांगं चक्रं। स्वरस्तु वे
द एव विशेषप्रतीतिकृन्न काव्य इति तस्याविषयो नोदाहृतः। इदं च केप्यसहमाना आहुः। स्वरोपि काक्वादिरू
पः काव्ये विशेषकृदेव। उदात्तादिरूपोपि मुनेः पाठोक्तदिशा शृंगारादिरसविशेषप्रतीतिकृदेवेति तद्विषयमुदा
हरणमुचितमेवेति तन्न। स्वराः काक्वादयस्तु उदात्तादयो वा व्यंग्यरूपमेव विशेषं प्रत्याययंति। न खलु प्रकृतोक्तम
नेकार्थशब्दस्यैकार्थनियंत्रणरूपं विशेषं। किं च यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावाद

नियन्त्रितत्वोऽर्थयोरनुरूपस्य चरवशो नैकत्रानियमनं वाच्यं॰ तदा तथाविधस्थले श्लेषानंगीकारप्रसंगेऽष्टि। न च तथा। अत एव वाक्यः श्लेषनिरूपणप्र
स्तावे॰ काव्यमार्गे स्थितो न गण्यते द्युति वनयः॥ इत्यलंकारमुपजीव्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दोपेतानन्मात्रसान्नीत्यादेर्ह
स्तादिनेच्छादिसिक्तानादीनां कमलकोरकाद्याकारत्वे॰ एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते तया शब्दस्यान्यार्थधीहेतुः साभिधा
मूला व्यंजना। यथा समतातपादानां महापात्रचतुर्दशभाषाभामहाकवीश्वरवंद्यशेखरसंधिविग्रहिकाणां। दुर्गालेपितविग्रहो मन
10 सिजं संमीलयंस्तेजसा प्रोद्यद्राजकुलो गृहीतगरिमा विश्वग्वृतो भोगिभिः। नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्गामाक्र
म्य विभूतिभूषिततनू राजत्युमावल्लभः॥ अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमा नाम महादेवी वल्लभभानुदेवनृपतिरूपे
ऽर्थे नियन्त्रिते व्यंजनयैव गौरीरूपोऽर्थो बोध्यते॰ एवमन्यत्र। लक्षणामूलमाह। लक्षणोपास्यपदस्य कृते तत्तु प्रयोजने। यया प्रत्या
य्यते सा तु व्यंजना लक्षणाश्रया। गंगायां घोष इत्यादौ जलमयाद्यर्थबोधनादभिधायां तटाद्यर्थबोधनाच्च लक्षणायां विरता
यां यया शीतत्वपावनत्वातिशयादि बोध्यते सा लक्षणामूला व्यंजना। एवं शाब्दीं व्यंजनामुक्त्वा आर्थीमाह। वक्तृबोद्धव्यवा १०
क्यानामन्यसंनिधिवाच्ययोः। प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च। वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसंभवा। व्य
ञ्जनेति संबध्यते। तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा। ममैव। कालो मधुः कुपित एष च पुष्पधन्वा धीरा वहन्ति र
तिखेदहराः समीराः। केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्दूरे पतिः कथय किं करणीयमद्य। अत्र एनं देशं प्रति शीघ्रं प्रच्छन्न
कामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयापि द्योत्यते। बोद्धव्यवैशिष्ट्ये यथा। निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो

नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न
पुनस्तस्याधमस्यांतिकं। अत्र तदंतिकमेव गतासीति विपरीतलक्षणया लक्ष्यते। तस्य रंतुमिति व्यंग्यं गतिपाद
दूतीवैशिष्ट्याद्बोध्यते। अन्यसंनिधिवैशिष्ट्ये यथा। उअ णिच्चलनिःफंदा भिसिणीपत्तंमि रेहइ बलाआ।
णिम्मलमरगअभाअणपडिट्ठिआ संखसुत्ति व्व। अत्र बलाकाया निःस्पंदत्वेन विश्वस्तत्वं तेनास्य
देशस्य विजनत्वं अतः संकेतस्थानमेतदिति कयापि संनिहितं प्रच्छन्नकामुकं प्रत्युच्यते। अत्रैव स्था
ननिर्जनत्वरूपव्यंग्यार्थवैशिष्ट्यं प्रयोजकं। भिन्नकंठध्वनिर्धीरैः काकुरित्यभिधीयते। इत्युक्तप्रका
रायाः काकोर्भेदा आकांक्षादयो ज्ञातव्याः। एतद्वैशिष्ट्ये यथा। गुरुपरतंत्रतया बत दूरतरं देशमुद्यतो गं
तुं। अलिकुलकोकिललालिते नैष्यति सखि सुरभिसमयेऽसौ। अत्र नैष्यत्यपि तु एष्यत्येवेति काक्वा
व्यज्यते। चेष्टावैशिष्ट्ये यथा। संकेतकालमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं नि
मीलितं। अत्र संध्या संकेतकाल इति पद्मनिमीलनादिचेष्टया कयाचिद्द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां

वैशिष्ट्ये बोद्धव्यं। त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता। अर्थानां वाच्यलक्ष्यव्यंग्यत्वेन त्रिरूपतया सर्वा
अप्यनंतरोक्ता व्यंजनास्त्रिविधाः। तत्र वाच्यार्थस्य व्यंजना यथा। कालो मधुरित्यादि। लक्ष्यार्थस्य यथा
निःशेषच्युतचंदनमित्यादि। व्यंग्यार्थस्य यथा। उअ णिच्चलेत्यादि। प्रकृतिप्रत्ययादेर्व्यंग्यत्वं प्रपंचयि
ष्यते। शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थांतराश्रयः। एकस्य व्यंजकत्वे तदन्यस्य सहकारिता। तयतः
शब्दो व्यंजकत्वेऽर्थांतरमपेक्षते। अर्थोऽपि शब्दं। तदेकस्य व्यंजकत्वे तदन्यस्य सहकारितावश्यमंगीकार्या। अ
भिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः। शब्दोऽपि वाचकस्तद्वल्लक्षको व्यंजकस्तथा। अभिधोपाधि
को वाचकः। लक्षणोपाधिको लक्षकः। व्यंजनोपाधिको व्यंजकः। किंच। तात्पर्याख्यां वृत्तिमाहुः। पदार्था १९
न्वयबोधने तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे। अभिधाया एकैकपदार्थबोधनविरमाद्वाक्यार्थरू
पस्य पदार्थान्वयस्य बोधिका नाम वृत्तिस्तदर्थश्च तात्पर्यार्थस्तद्बोधकं च वाक्यं वाक्यमित्यभिहितान्व
यवादिनां मतं॥॥ इति साहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः॥ ॥ ॥ ॥

अथ कोयं रस इत्युच्यते। विभावेनानुभावेन व्यक्तः संचारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेत
सां॥ विभावादयो वक्ष्यन्ते। सात्त्विकाश्चानुभावरूपत्वान्न पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपांतरं परि
णतः। व्यक्तो व्यक्तीकृत एव रसः। न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। तदुक्तं लोचनकारैः। रसाः प्र
तीयंत इति त्वोदनं पचतीतिवद्व्यवहार इति। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः
स्थायिपदोपादानमित्यादिनामपि रसांतरेषु व्यस्थायित्वप्रतिपादनार्थं। ततश्च हासक्रोधादयः शृं
गारवीरादावव्यभिचारिण एव। तदुक्तं। रसावस्थः परं भावः स्थायितां प्रतिपद्यत इति। अस्य स्व
रूपकथनगर्भ आस्वादप्रकारः कथ्यते। सत्त्वोद्रेकादखंडस्वप्रकाशानंदचिन्मयः। वे
द्यांतरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः। स्वा
कारवदभिन्नत्वेनायमास्वाद्यते रसः। रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यत इति
उक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनांतरो धर्मः सत्त्वं। सत्त्वोद्रेको रजस्तमसी अ

सिमूर्त्याविर्भावः॥ अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्॥ अखण्ड इत्येक एवायं विभा
वादिरत्यादिप्रकाशसुखचमत्कारात्मकः॥ अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणे
रीत्या॥ चिन्मय इति स्वरूपार्थे मयट्॥ चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः। तत्
12 प्राणत्वाच्चास्य॥ वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तं त
दाह धर्मदत्तः स्वग्रन्थे। रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्वत्राप्य
द्भुतो रसः॥ अतस्त्वद्भुतमेवाह कृती नारायणो रसम् इति॥ केचिदिति प्राक्तनपुण्यशालिभि
रुक्तं पुण्यवन्तः प्रमिण्वन्ति योगीव रससन्ततिम्। यद्यपि स्वादः काव्यार्थसंभेदादात्मानन्द १२
समुद्भव इत्युक्तदिशा रसस्य स्वादानतिरिक्तत्वं तथापि रसः स्वाद्यत इति काल्पनिकमे
दमुररीकृत्य कर्मकर्तरि वा प्रयोगः॥ तदुक्तं। रस्यमानतामात्रसारत्वात्प्रकाशैकघन शारीरस्य
स्यैव हि रसस्तिता एवमन्यत्रापि एवंविधस्थले तूपचारेण प्रयोगो ज्ञेयः। न चैतावता र

सस्याङ्गि यत्वमुक्तं भवतीति व्यंजनायास्तज्ज्ञानरूपत्वात् द्वयोरैक्यमापतितं तत्र श्वस्य ज्ञानेता
न्यथा हेतुः सिद्धेर्व्यंजको मतः। यथा दीपोन्यथाभावे को विशेषोस्य कारकादित्युक्ते दिशा
घटप्रदीपवद्व्यंग्यव्यंजकयोः पार्थक्यमेवेति। कथं रसस्य तेति चेत्तस्य मुक्तं। अतएवाहुः
विलक्षणएवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्य इति कश्चिद्व्यापारः अतएवहि रसास्वादन
चमत्करणादयो विलक्षणएव व्यपदेशा इति। अभिधादिविलक्षणव्यापारमात्र
साधनग्राहितेरेभिः रसादीनां व्यंग्यत्वमुक्तं भवतीति। ननु तर्हि करुणादीनां दुःखत्वादसत्वं
नस्यादित्युच्यते। करुणादावपि रसे जायते यत्परं सुखं। सचेतसामनुभवः प्रमाणं तत्र
केवलं। आदिशब्दात् बीभत्सभयानकादयः। तथाप्यसहृदयानां मुख्यमुद्रणाय पर
क्षांतरमुच्यते। किंच तेषु यदा दुःखं न कोपि स्यात्तदुन्मुखः। नहि कश्चित्सचेतन आत्मनो
दुःखाय प्रवर्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्सुखमयत्व

मेवा ऽनुपपत्ते तस्माद्दातथारामायणादीनां भविभावादुःखहेतुता । करुणरसस्य दुःखहेतुत्वे करुणरसप्रधा
न रामायणादिप्रबंधानामपि दुःखहेतुत्वं स्यात् । ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह । हेतुत्वं हर्ष:
शोकादेर्गतेभ्यो लोकसंश्रया तु शोकहर्षादयो लोके जायंते तां नाम लौकिकाः । अलौकिकविभाव
13 त्वं प्राप्तेभ्यः काव्यसंश्रया तु । सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः । ये खलु रामवनवासादयो
लोके दुःखकारणानीत्युच्यंते । त एव काव्यनाट्यसमर्पिता अलौकिकविभावनादिव्यापा×न× खतया
कारणशब्दवाच्यत्वे परिहृत्य अलौकिकविभावशब्दवाच्यत्वं भजंते । तेभ्यश्च सुरतेदंतघातादिभ्य इव सु
खमेव जायते । अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायंत इति लोक ए १२
व नियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायत इति नियमान्न कश्चिद्दोषः । कथं तर्हि
हरिश्चंद्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायंते इत्युच्यंते । अश्रुपाता
दयस्तद्द्रुतत्वाच्चेतसो मताः । कथं काव्यतः सर्वेषामीदृशी रससामिव्यक्तिर्न जायत इत्याह । न जाय
ते तदास्वादो विना रत्यादिवासनां । वासना चेदानीतनी प्राक्तनी च रसास्वादहेतुः । तत्र यदा

घातस्यात्तदाश्रोत्रियजरन्मीमांसकादीनामपि स्यात्। यदि द्वितीयस्तर्हि न स्यात्तदा यक्षादीनामपि। केषांचि
द्रसोद्बोधो न दृश्यते तन्न स्यात्। उक्तं च धर्मदत्तेन। सवासनानां सभ्यानां रसस्यास्वादनं भवेत्॥ निर्वास
नास्तु रंगान्तः काष्ठकुड्याश्मसंनिभाः इति। ननु कथं रामादिरत्याद्युद्बोधकारणैः सामाजिकरत्या
द्युद्बोध इत्युच्यते। व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः॥ तत्प्रभावेन यस्यासन्पाथो
धिप्लवनादयः। प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते इति। ननु मनुष्यमात्रस्य समुद्रलंघनादावु
त्साहोद्बोध इत्युच्यते। उत्साहादिसमुद्बोधः साधारण्याभिमानतः। नृणामपि समुद्रादि लि
लंघनादौ न तु व्यतिरत्यादयोऽपि साधारण्येन प्रतीयन्त इत्याह। साधारण्येन रत्यादिरपि
तद्वत्प्रतीयते। रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातंकादिर्भवेत्। परगतत्वेन परस्य
तापत्तिः॥ विभावादयोऽपि प्रथमं साधारण्येन प्रतीयन्त इत्याह। परस्य न परस्येति ममेति न ममेति
च। तदास्वादे विभावादेः परिच्छेदो न विद्यते। ननु तथापि कथमेवं लौकिकरत्तेरेषां विभाव

वादीनामित्युच्यते। विभावनादिव्यापारमलौकिकमुपेयुषां। अलौकिकत्वमेतेषां भूषणं न तु दूषणं। आदि
शब्दादनुभावनसंचारणे। तत्र विभावनं रत्यादेर्विशेषेण स्वादांकुरणयोग्यतानयनं। अनुभावनं
मेवंभूतस्य रत्यादेः समनंतरमेव रसादिरूपतया भावनं। संचारणं तथाभूतस्यैव तस्य सम्य[illegible]क्कार
15 णं। विभावनादीनां यथासंख्यं कारणकार्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधकारणत्व
मित्युच्यते। कारणकार्यसंचारिरूपा अपि हि लोकतः। रसोद्बोधे विभावाद्याः कारणान्येव ते मताः।
ननु कथं तर्हि रसास्वादे तेषामेकः प्रतिभास इत्युच्यते। प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते। २४
ततः संवलितः सर्वो विभावादिः सचेतसां। प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत्। यथा
खंडमरीचादीनां संमेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे सं[illegible]जायते विभावादिसं
मेलनादिहापि तथेत्यर्थः। ननु यदि विभावानुभावव्यभिचारादिभि[illegible]मिलितैरेव रसस्त
त्कथं तेषामेकस्य द्वयोर्वा सद्भावे रसः स्यादित्युच्यते। स[illegible]द्भावश्चेद्विभावादेर्द्वयोरे

कस्य वा भवेत्। सति च व्यस्तमापेक्षे तदा दोषो न विद्यते। अन्यसमाक्षेपश्चासकरणादिवशात्। यथा।
दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथा
स्या वपुः। अत्र मालविकामभिलषतो ऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णनेऽपि सं
चारिणामौत्सुक्यादीनामनुभवानां च नयनविस्फारादीनामौचित्यादेवाक्षेपः। एव
मन्याक्षेपेऽप्यूह्यो। अनुकार्यगतरस इति यदा स्तः प्रत्याह। पारमित्या लौकिकत्वात्सान्तरायत
तया यथा। अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्। सीतादिदर्शनादिजो रामादेर
प्युद्बोधोऽपि परमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायस्तस्मात्कथं रसरूपता
मियात्। रसस्यैतद्धर्मत्रयपरिच्छेदाणुधर्मकत्वात्। अनुकर्तृगतत्वं चास्य निरस्यति।

शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपतां । दर्शयन् नर्तको नैव रसस्यास्वादको भवेत् । किं च काव्यार्थभावनेनायम
पि सभ्यपदास्पदं । यदि पुनर्नर्तकोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत् तदासोऽपि सभ्यमध्य
एव गण्यते । नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः । यो हि ज्ञाप्यो घटादिः स सन्नपि कदाचिद् ज्ञातो
15 भवति न ह्ययं तथा प्रतीतिमन्तरेण भावात् । यस्मादेष विभावादिसमूहालम्बनात्मकस्तस्मान्न कार्यः ।
यदि रसः कार्यः स्यात् विभावादिज्ञानकारणक एव स्यात् । तत्त्वं रसप्रतीतिकाले विभावादयो न प्रतीय
रन् । कारणज्ञानकार्यज्ञानयोर्युगपद्दर्शनात् । न हि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा भ
वति । रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणत्वमित्यभिप्रायः १५
नो नित्यः पूर्वसंवेदनोज्झितः । असंवेदनकाले हि न भावोऽप्यस्य विद्यते । न खलु नित्यस्य वस्तुनोऽसंवेद
नकाले असंभवः । नापि भविष्यन् । साक्षादानन्दमयप्रकाशरूपत्वात् । कार्यज्ञाप्यविलक्षणभावान्
न वर्तमानोऽपि । विभावादिपरामर्शविषयत्वात् तस्य च न सा । परानन्दमयत्वेन संवेद्यत्वादपि स्फुटे । न

निर्विकल्पकज्ञानं तस्य ग्राहकमिष्यते। यथा मिलितावसंसर्गयोग्यचयिरहाल्लव। सविकल्पकसंवेद्यः। सविकल्पकज्ञान
संवेद्यानां हि वचनप्रयोगयोग्यता न तु रसस्य तथा। साक्षात्कारतया न च। परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसंभवात्
तत्कथमलौकिकत्वमस्य तत्राह इत्यपूर्वनिरूपणप्रकारस्येत्याह। तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयं। तत्कि
प्रमाणं पुनस्तस्य सद्भावे इत्याह। प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतं। चर्वणास्वादनं स्वादः श्लो
कोऽव्याप्यर्थसिद्धं वा धाराप्यानंदसमुद्भवे इत्युक्तप्रकारे. ननु यदि रसो न कार्यस्तत्कथं महर्षिणा विभावानुभावव्यभि
चारिसंयोगाद्रसनिष्पत्तिरिति लक्षणं कृतं इत्युच्यते। निष्पत्त्या चर्वणस्येव निष्पत्तिरूपचारतः। यद्यपि रसा
भिन्नतया चर्वणस्यापि न कार्यत्वं तथापि तस्य कादाचित्कतया कार्यत्वमुपचर्यते। अवाच्यत्वादिकं तस्य
वक्ष्ये व्यंजनानिरूपणे। तस्यादिशब्दाल्लक्ष्यत्वादि. ननु यदि मिलिता रत्यादयो रसस्तत्कथमस्य स्वप्रकाशत्वं
कथं वाऽखंडत्वमित्याह। रत्यादिज्ञानतादात्म्यादेव यस्माद्रसो भवेत्। अतोऽस्य स्वप्रकाशत्वमखंडत्वं च सिध्यति।

यदि रत्यादिप्रकाशशरीरातिरिक्तस्यानन्दैवास्य स्वप्रकाशत्वं न सिध्येत्। न च तथा तादात्म्यांगीका
रात्। उक्तं हि यद्यपि रसानन्यतया चर्व्वणापि न कार्य्या तथापि कदाचित्कतया कार्य्यत्वमुपकल्प्य तदेका
त्म्यनन्यनादिवासनापरिणतिरूपे रत्यादिभागेव व्यवहार इति। सुखादितादात्म्यांगीकारे चास्मा
16 कीं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेयाः इति च। अभिन्नोपि स प्रमात्रावा
सन्नोपनीतरत्यादितादात्म्येन गोचरीकृत इति च। ज्ञानस्य स्वप्रकाशत्वमनंगीकुर्वतामुपरि
वेदान्तिभिरेव पातनीयो दण्डः। तादात्म्यादेव चास्याखण्डत्वं रत्यादयो हि प्रथममेकैकशः प्रतीयमा १६
नाः प्रथमेखण्डशोच्यन्ते खण्डतोऽपरमार्थतः खण्डरूपं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यमिति
च। अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह रत्याद्युद्बोधका लोके वि
भावाः काव्यनाट्ययोः। ये हि लोके रामादिगतरत्या द्युद्बोधकारणानि सीतादयस्त एव काव्यना

स्त १

ध्वनिवेशिताः संतो विभाव्यन्ते। आस्वादांकुरणप्रादुर्भावयोग्याः क्रियन्ते समाजिकरत्यादिभावा एभिरिति वि
भावा इत्युच्यन्ते। तदुक्तं भर्तृहरिणा। शब्दोपहितरूपांस्तान्बुद्धेर्विषयतां गतान्। प्रत्यक्षानिव कंसादीन्
साधनत्वेन मन्यत इति। तद्भेदानाह। आलंबनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ। स्पष्टं। तत्रालंबनो नायकादिस्त
मालंब्य रसोदयात्। आदिशब्दान्नायकप्रतिनायकादयः। यो परस्परमस्य विभावत्वं तत्स्वरूपवर्णनेनैव दर्श्य
ते। तत्र नायकः। त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही। दक्षोनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्
नेता। दक्षः क्षिप्रकारी। शीलं सद्वृत्तं। एवमादिगुणसंपन्नो नेता नायको भवति। तद्भेदानाह। धीरो
दात्तो धीरोद्धतस्तथा धीरललितश्च। धीरः प्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः। स्पष्टं। तत्र धीरो
दात्तः। अविकत्थनः क्षमावानतिगंभीरो महासत्त्वः। स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः क
थितः। अविकत्थनो नात्मनः श्लाघाकरः। महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः। निगूढमानो विनयछन्नगर्वः। दृढव्र

तांशीकृतनिर्वाहकः। यथा रामयुधिष्ठिरादिः। अथ धीरोद्धतः। मायापरः प्रचंडश्चपलोहंकारदर्पभूयिष्ठः। आत्मश्ला
घानिरतो धीरैर्धीरोद्धतः कथितः। यथा भीमसेनादिः। अथ धीरललितः। निश्चिंतो मृदुरनिशं कलापरो धीरललि
तः स्यात्। यथा रत्नावल्यां वत्सराजः। अथ धीरप्रशांतः। सामान्यगुणैर्भूयान्द्विजादिको धीरशांतः स्यात्। यथा
17 मालतीमाधवादौ माधवः। एषां च शृंगाररूपत्वेभेदानाह। एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा।
तत्र तेषां धीरोद्धतानां प्रत्येकं दक्षिणधृष्टानुकूलशठत्वेन चतुर्धा प्रकारो नायकः। एषु त्वनेकमहिलासु समरागो दक्षि
णः कथितः। द्वयोस्त्रिचतुःप्रभृतिषु वा नायिकासु तुल्यानुरागो दक्षिणो नायकः। यथा स्नाता तिष्ठति कुंतलेश्वरसुता वा
रोंगराजस्वसुः द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च। इत्यंतःपुरसुंदरीः प्रति मया विज्ञाय विज्ञापिते देवेनाप्रतिपत्ति १७
मूढमनसा द्वित्राः स्थितं नाडिकाः। कृतागा अपि निःशंकस्तर्जितोपि न लज्जितः। दृष्टदोषोपि मिथ्यावाक्कथितो धृष्टनायकः।
यथा मम क्षोणीं नीरस्य मुखं विधुं वितनुमहे परतः समीपं ततः पादेन प्रहतं तया सपदि तं धृत्वा सहासे मयि। किंचित्तत्र विधातुमक्षमत
या बाष्पस्त्यजंत्याः सखे ध्यातश्चेतसि कौतुके वितनुते कोपोपि वामभ्रुवः। अनुकूल एकनिरतः। एकनायिकायामासक्तो अनुकू
लनायकः। यथा। अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नो ज्वलन्नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः। किंतु

न्येपि जना वदंति सुभगोप्यस्याः पतिर्नान्यतो दृष्टिं निक्षिपतीति विस्मयमियं तामन्यामहे दुःस्थितं ।शठो यमेकत्र वदनावायः
दर्शितवहिरनुरागो पि विप्रियमन्यत्र गूढमाचरति यः पुनरेकस्यामेव नायिकायां वद्धभावो द्वयोरपि नायिकयोर्वहिर्दर्शितानु
रागो न्यस्यां नायिकायां गूढविप्रियमाचरति स धृष्टनायकः ।यथा। शठो न्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसाय
दाश्लिष्यन्नेव प्रशिथिलभुजग्रंथिरभवः ।तदेतत्क्वाचक्षे घृतमधुमयत्वद्बहुवचोविषेणाघूर्णंती किमपि न सखी
मे गणयति । एषां च सर्वेषामुत्तममध्यमाधमत्वेन त्रैविध्यादुक्तनायकभेदाश्चत्वारिंशत्तथाष्टौ च। सर्वेषामुक्त
षोडशभेदानां ।। अथ प्रसंगात्तेषां सहायानाह । दूरानुवर्तिनि स्यात्तस्य प्रासंगिकेतिवृत्ते तु। किंचित्तद्गुणहीनश्च
सहाय एवास्य पीठमर्दाख्यः ।तस्य नायकस्य बहुव्यापिप्रसंगागतेतिवृत्तेनंतरोक्तैर्नायकसामान्यगुणैः किं
चिदूनः पीठमर्दनामा सहायो भवति ।यथा रामादीनां सुग्रीवादयः ।। अथ शृंगारविषये सहायाः । शृंगारस्य स
हाया विटचेटविदूषकाद्याः स्युः । भक्ता नर्मसु निपुणाः कुपितवधूमानभंजनाः शुद्धाः । आदिग्रहणान्मालाकाररज
कतांबूलिकगांधिकादयः ।तत्र विटः । संभोगहीनसंपद्विटस्तु धूर्तः कलैकदेशज्ञः । वेशोपचारकुशलो वाग्मी मधु

राधवकुमतो गोष्ठ्यां। वेटः प्रसिद्धः। कुसुमवसंतो यज्ञियः कर्मनपुर्वेण भाषाधेः। हास्यकरः कलहरतिर्विदूषकस्यात्य
कर्मज्ञः। स्वकर्मभोजनादि। अर्थचिंतनसहायमानाह। मंत्री स्यादर्थानां चिंतायां। अर्थास्तन्त्रावापादयः। यत्त्व
त्र सहायकथनप्रस्तावे मंत्री स्वेवोभयं नापि सरकात स्यार्थचिंतनद्वितिकेनाचिल्लक्षणं कृतं। तदपि राज्ञोऽर्थचिं
18 तनोपायलक्षणप्रकरणे लक्षितव्यं। न तु सहायकथनप्रस्तावे नायकस्यार्थचिंतने मंत्री सहाय इत्युक्तेऽपि ना
नायकस्यार्थत एव सिद्धत्वात्। यदप्युक्तं मंत्रिणा ललितः शेषा मंत्रिस्वायत्तसिद्धयः। तदपि लक्षणकथनेनैव
धीरललितस्य मंत्रिमात्रयत्तार्थचिंतनोपपत्तेर्गतार्थं। न चार्थचिंतने तस्य मंत्री सहायः। किं तु स्वयमेव १८
निःष्पादकस्य स्यार्थचिंतनाद्यभावात्। अथांतःपुरसहायाः। तत्र दूत्ययरोधो वामनषंढकिराताम्लेच्छाभीराः शकाः
रकुब्जाद्याः। मदवृर्वतामिमानी दुःकुलतैश्वर्यसंपन्नः। सोऽयमनूढाभ्रातारा ज्ञःश्यालः शकारः इत्युक्तः। आद्य
शब्दान्मूकादयः। तत्र षंढवामनकुब्जादयो यथा रत्नावल्यां। नष्टं वर्षवरैर्मनुष्यगणना भावादपास्य त्रपाम
ंतःकंचुकिकंचुकस्य विशति त्रासादयं वामनः। पर्यंताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं कुब्जा नीचतयैव यांति

यानकैरात्मेक्षणार्थं किनः॥ ॥शकारो दत्तककृदिकादिपंषप्रसिद्धः। अन्येपि यथादर्शनं ज्ञेयाः॥ ॥ ॥
अथ दंडसहायाः। दंडे सुहृत्कुमाराटविकाः सामन्तसैनिकौ यान्या। दुष्टनिग्रहो दंडः। स्पष्टं। अथ धर्मसहायाः
ऋत्विक्पुरोधसस्तु ब्रह्मविदस्तापसास्तथा धर्मे। ब्रह्मविदो वेदविदः आत्मविदो वा। अत्रोत्तमाः पीठम-
र्दाद्याः। आदिशब्दान्मन्त्रिपुरोहितादयः। मध्यौ विटविदूषकौ। तथा शकारचेटाद्याः अधमाः परिकीर्तिताः
आदिशब्दात्ताम्बूलिकगान्धिकादयः। अथ प्रसंगाद्दूतानां विभागगर्भं लक्षणमाह। निसृष्टार्थो मि-
तार्थश्च तथा संदेशहारकः। कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः। अत्र कार्यप्रेष्यो दूत इ-
ति लक्षणं। तत्र। उभयोर्भावमुन्नीय स्वयं वदति चोत्तरं। सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृ-
तः। उभयोरिति येन प्रेषितो यदन्तिके च प्रहितः। मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थ-
कः। यावद्भाषितसंदेशहारी संदेशहारकः॥ ॥ अथ सात्त्विका नायकगुणाः॥ ॥ ~~[illegible]~~
शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यतेजसी। ललितौदार्यमित्यष्टौ सात्त्विकाः पौरुषा गुणाः। तत्र

तत्रशूरतादक्षतासत्यंमहोत्साहोनुरागिता।नीचेघृणाधिकेस्पर्द्धायतःशोभेतितांविदुः।तत्रानुरागिता
यथा।अहमेवमतोमहीपतेरितिसर्वःप्रकृतिष्वचिन्तयत्।उदधेरिवनिम्नगाशतेष्वभवन्नास्यविमान
19 क्वचित्।एवमन्यदपि।अथविलासः।धीरादृष्टिर्गतिश्चित्राविलासेसस्मितंवचः।यथा।दृष्टिस्तृणीकृ
तजगत्त्रयसत्त्वसाराधीरोद्धतानमयतीवगतिर्धरित्री।कौमारकेपिगिरिवद्गुरुतांदधानोवीरोरसः
किमयमेत्युतदर्पएव।संक्षोभेष्वप्यनुद्वेगोमाधुर्यंपरिकीर्तितं।उदाहरणमूह्यं।व्यवसायादचलनंधैर्यं १९
विघ्नेमहत्यपि।यथा।श्रुताप्सरोगीतिरपिक्षणेस्मिन्हरःप्रसंख्यानपरोबभूव।आत्मेश्वराणांनहिजा
तुविघ्नाःसमाधिभेदप्रभवोभवन्ति।भीशोकक्रोधहर्षाद्यैःगाम्भीर्यंनिर्विकारिता।यथा।आहूतस्याभिषेकायविसृष्ट
स्यवनायच।नमयालक्षितस्तस्यस्वल्पोप्याकारविभ्रमः।अधिक्षेपापमानादेःप्रयुक्तस्यपरेणयत्।प्राणात्ययेपि
सहनंतत्तेजःसमुदाहृतं।वाग्वेषयोर्मधुरतातद्वच्छृंगारचेष्टितंललितं।दानंसप्रियभाषणमौदार्यंशत्रुमित्रयोःसमता।एषामप्युदाहरणान्यूह्यानि

अथ नायिकाभेदाः। स्वान्या साधारणी स्त्री ति। नायकसामान्यगुणैर्भवति यथासंभवमेषूक्ता। नायिका पुनः नायकसामान्यगुणैस्त्या-
गादिभिर्यथासंभवं युक्ता भवति सा च स्वस्त्री अन्यस्त्री साधारणस्त्रीति त्रिभेदा। तत्र स्वस्त्री विनयार्जवादियुक्ता गृहकर्मपरा पति-
व्रता स्वीया। यथा। लज्जोपज्जुतपसाहणाइं परतत्तिणिप्पिवासाइं॥ अविणअदुम्मेहाइं धण्णाण घरे कलत्ताइं। सापि कथिता त्रिभेदा।
मुग्धा मध्या प्रगल्भेति॥ तत्र प्रथमावतीर्णयौवनमदनविकारा रतौ वामा॥ कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥ तत्र प्रथ-
मावतीर्णयौवना यथा मम तातपादानां॥ मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां दूरं यात्युदरं च रोमलतिका नेत्रार्जवं धावति।
कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणादंगानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः॥ प्रथमावतीर्णमदनविकारा यथा मम
प्रभावतीपरिणये॥ इत्रे सालसमंथरं भुवि पदं निर्याति नान्तःपुरान्नोद्दामं हसति क्षणात्कलहसा पतिह्रीयंत्रणां कामपि। किंचि-
द्भावगभीरवक्रिमलवः स्पृष्टं मनाग्भाषते सभ्रूभंगमुदास्ते प्रियकथामुल्लासयंतीं सखीं॥ रते वामा यथा॥ दृष्टा दृष्टिमधो ददाति
कुरुते नालापमाभाषिता शय्यायां परिवृत्य तिष्ठति बलादालिंगिता वेपते। निर्यांतीषु सखीषु वासभवनान्निर्गन्तुमेवेहते जा-
ता वामतयैव संप्रति मम प्रीत्यै नवोढा प्रिया॥ माने मृदुर्यथा॥ सा पत्युः प्रथमेपराधसमये सख्योपदेशं विना नो जानाति सवि-
भ्रमांगवलनावक्रोक्तिसंसूचनं॥ स्वच्छैरच्छकपोलपालिगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति गलल्लो-
लालकैरश्रुभिः। समधिकलज्जावती यथा॥ इत्रे सालसमित्यत्रैव श्लोके॥ अत्र समधिकलज्जावत्त्वेनापि लभ्याया इति वात्त

तापविच्छित्तिविह्वोकविभ्रमयाः पुनः कथनं। अथ मध्या। मध्या विचित्रसुरता प्ररूढस्मरयौवना। ईषत्प्रगल्भवचना मध्यमव्रीडिता
तथा। विचित्रसुरता यथा॥ कांते यथाकथमपि प्रथिते मृगाक्ष्या चातुर्यमुद्धतमनोभवयारतेषु। तत्कूजितान्यनुवदद्भिरनेकवा
रं शिष्यायितं गृहकपोतशतैर्यथा स्यात्॥ प्ररूढस्मरा यथा। प्रौढस्फुरयौवना यथा ममा। नेत्रे खंजनगंजने सरसिज
प्रत्यर्थिपाणिद्वयं वक्षोजौ करिकुंभविभ्रमकरी मन्युलतिं गच्छतः। कांतिः कांचनचंपकप्रतिनिधिर्वाणी सुधा
धिनी स्मेरेंदीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा। एवमन्यापि। अथ प्रगल्भा। स्मरांधा गाढतारुण्या समस्त
रतकोविदा। भावोन्नता दरव्रीडा प्रा(ग)ल्भा क्रांतनायका॥ स्मरांधा यथा। धन्यासि या कथयसि प्रियसंगमेपि
विश्रब्धचाटुकशतानि रतांतरेषु। नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि॥ गाढ २०
तारुण्या यथा। अत्युन्नतस्तनमुरो नयने सुदीर्घे वक्रे भ्रुवावतितरां वचनं ततोपि। मध्योधिकं तनुरनूनगुरु
रुर्नितंबो मंदा गतिः किमपि चाद्भुतयौवनायाः। विविधसुरता यथा। क्वचित्तांबूलाक्तः क्वचिदगुरुपंकां
कमलिनः क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः। वलीभंगाभोगैरलकपतितैः शीर्णकुसुमैः स्त्रि
यः सर्वावस्थं कथयति रतं प्रच्छदपटः। भावोन्नता यथा। मधुवचनैः सभ्रूभंगैः कृतांगुलितर्जनै रभस

रचितेरंगन्यासेमहोत्सवबंधिभिः। अत्र सकृदसकृत्स्फारस्मारेरपांगविलोकितैस्त्रिभुवनजये सापेक्षो करोति स
हायतां॥ स्वल्पव्रीडा यथा। धन्यासि का या कथयसि सुरतं चैव। अकोतनोपका यथा। स्वामिन्भंगुरयालकं सतिलकं भा
लं विलासिन्कुरु प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय। इत्युक्ता सुरतावसानसमये संपूर्णचंद्रानना स्पृ
ष्टा तेन तथेव जातपुलका प्राप्ता पुनर्मोहनम्। मध्याप्रगल्भयोर्भेदांतराण्याह॥ ते धीरा चाप्यधीरा च धीरेति त्रिविधे
ते मध्या प्रगल्भे। तत्र सोत्प्रासवक्रोक्त्या मध्याधीरा वदेद्रुषा। धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः। तत्र मध्याधी
रा यथा। तदवितथमवादीर्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यद्दुकूलं दधानः। मदधिवसतिमागाः कामिनां मंडनश्री
र्व्रजति हि सफलत्वं वल्लभालोकनेन। मध्येव धीराधीरा यथा। बाले नाथ विमुंच मानिनि रुषं रोषान्मया किं कृतं खेदोस्मा
सु न मेपराध्यति भवान्सर्वेपराधा मयि। तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन्मम का तवास्मि
दयिता नास्मीत्यतो रुद्यते। इयमेवाधीरा यथा। सार्धं मनोरथशतैस्तव धूर्त कांता सैव स्थिता मनसि कृत्रिम
भावरम्या॥ अस्माकमस्ति न कथंचिदिहावकाशस्तस्मात्कृतं चरणपातविडंबनाभिः॥ प्रगल्भाय दिधी

स्यात् ॥ तत्र कोपाकृतिस्तदा ॥ उदास्ते स्तु रते तत्र दर्शयन्त्याद्दराद्बहिः । तत्र धीरा यथा । एकत्रासन संस्थितिः परिहृता प्र
त्युद्गमाद्दूरतस्ताम्बूलाहरणच्छलेन रभसाश्लेषोपि संविघ्नितः । आलापोपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः । धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुं । यथा मम मान्त्रंजे
कृतो सुन्दर हरसि यन्नो मम मनः प्रसभम् । किं पुनरलंकृतस्त्वं संप्रति नखरक्षतैस्तस्याः ॥ तर्जयेत्ताडयेदन्या
९। मन्याधीरा । प्रेणा वा स्यमुखमितीपत्रैर्वा । अन्यत्र सर्वत्र रूपेष्वनुवर्तते । प्रत्येकं ता अपि द्विधा । कनिष्ठा ज्येष्ठा रूप
त्वान्नायकं प्रणयं प्रति । ताभ्यनन्तरोक्ताः षड्विधा नायकाः । यथा । दृष्ट्वैकासन संस्थिते प्रियतमे पश्चादुपे
त्यादराद् एकस्या नयने निमील्य विहित क्रीडानुबन्धच्छलः । ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मा २९
नसामन्तर्हासलसत्कपोलफलकां धूर्त्तोपरां चुम्बति ॥ मध्याप्रगल्भयोर्भेदास्तेन द्वादश कीर्तिता ।
मुग्धा त्वेकैव तेन स्युः स्वीया भेदास्त्रयोदश । परकीया द्विधा प्रोक्ता परोढा कन्यका यथा ।
तत्र यात्रादिनिरतान्योढा कुलटा गलितत्रपा । यथा । स्वामी निःश्वसितेप्यसूयति मनोजिघ्रः स

पत्नीजनः स्वभ्रूरिंगितदैवतं नयनयोरीहालिहो यान्तरः। नदूरादयमंजलिः किममुना दृग्भंगिभागेन ते वैदग्धीरसि
कप्रबंधरसिकव्यापारोपमत्रश्रमः। अत्र हिममपरिणीतानाच्छादनदोषेण न परस्या एव ननु वल्लभवर्त्तुवे
दग्धीमधुरवधूरसिकेनया मम वल्लभो सात्यादि व्यंग्यार्थबलादस्याः परकामुकविषयारतिः प्रतीय
ते। कन्या तु जातोपयमा सलज्जा नवयौवना। अस्याः पित्राद्यायत्तत्वात्परकीयत्वं। यथा मालतीमाधवादौ माल
त्यादिः। धीरा कन्यात्वं ल्ना स्याद्दृश्या सामान्यनायिका। निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि। वित्तमात्रं समा
लोक्य सा रागं दर्शयेद्बहिः। काममंगीकृतमपि परिक्षीणधनं नरं। माता निःकासयेदेवा पुनः संधानकां
क्षया। तस्कराः पुंडकाः मुरवाः शिखवाद्यस्तधना स्तथा। लिंगिनश्छलकामाद्या अस्याः प्रायेण वल्लभाः।।
एषापि मदनायत्ता कापि सत्यानुरागिणी। रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभं। प्रच्छन्नकाम
यते। प्रच्छन्नकायाः --- डकोयातपुंड्रकादिः। तत्र रागहीना यथा। लटकमेलकादौ मदनमंजर्यादिः।
रक्ता यथा। मृच्छकटिकादौ वसंतसेनादिः। पुनरस्था अवस्थाभेदेनाष्टौ ताः षोडशभेदिनाः।। स्वाधीन
भर्तृका तद्वत्खंडिताथाभिसारिका। कलहांतरि [redacted]
ता विप्रलब्धा प्रोषितभर्तृका। अन्या वासकसज्जा स्याद्विरहोत्कंठिता तथा। तत्र कांतो रतिगुणाकृ
ष्टो न जहाति यदंतिकं। विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका। यथा अस्माकं सखि वास

सीत्यादि। पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः सा खण्डितेति कथिता धीरेर्ष्याविना। यथा तदवितथमनादि
ष्टमिति। अभिसारयते कान्तं या मन्मथवशंवदा। स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका। क्रमाद्यथा॥
नचमेव गच्छति यथा लघुतां करुणां यथा च कुन्दते समुपनिपुणान्तयेन। मा भिगम्य वदेद मिदूतीकाचि
दिति संदिदिशो कुन्तलीर्करकंकणद्यामिदं वकुटदर्भे स्खलायत्नेन प्रतिपादिता मुखरया मंजीरयो
22 मूकता। आरब्धेरभसान्मया प्रियसखी क्रीडाभिसारोत्सवे चेडालस्ति मिरावगुंठनपटाक्षेप
विधस्ते विधुः। सत्ती नास्वेषु गात्रेषु मूकाचूतविभूषणा। अवगुंठनसंवीता कुलजाभिसारेद्यादि। विचित्रोज्ज्व
लवेषा तुरणन्नुपुरकंकणा। प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यादि। तत्राद्ये क्षिप्रमित्यादि। अनयोरुदाहृतामुदाह
रणम्। प्रसंगादभिसारिकाणां स्थानानि कथ्यन्ते। क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनं। माला २२
पं चाथ श्मशानं च नद्यादीनां तटी तथा। एवं कृताभिसाराणां पुंश्चलीनां विनोदने। स्थानान्यष्टौ तथा।
ध्वांतच्छन्नौ कुत्रापि चिदाश्रय। चाटुकारमपि प्राणनाथं रोषादपास्य या। पश्चात्तापमवाप्नोति कल
हान्तरिता तु सा। यथा ममता नपादानाग्रह। नो चाटुश्रवणं कृतं न च दृशा हारोन्तिके। वीक्षितः का

कांतस्य प्रियहेतवे निजसखीवाचोपि दूरीकृताः। पादांते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया पाणि
भ्यामवरुध्य हंत सहसा कंठे कथं नार्पितः॥ प्रियः कृतानेकसंकेतयस्यां नायाति संनिधिं॥ विप्रलब्धां तु
तां ज्ञेया नितांतमवमानितां॥ यथा। उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः। यातः परम
पि जीवेज्जीवितनाथो भवेत्तस्याः॥ नानाकार्यवशाद्यस्या दूरदेशं गतः पतिः। सा मनोभव
दुःखार्ता भवेत्प्रोषितभर्तृका॥ यथा तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि
सहचरे चक्रवाकीमिवैकाम्॥ गाढोत्कंठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये शिशिर
मथितां पद्मिनीं वान्यरूपाम्॥ कुतोपि नस्वस्याः सञ्जातेवासवेश्मनि॥ सानुवासकसज्जी
हृदि नवप्रियसंगमा॥ यथा राघवानंदनाम्नो विदूरे केयूरं कर्णे करपुटे रत्नवलये रत्नं गु
वर्णग्रीवाभरणानि तिलके पंक्तिमनया॥ नववामे कामैकावालिमविमयिही विरचेनपथ्यं नेपथ्य
वकुतरमनेगोत्सवविधौ॥ आगंतुकृतचित्तोपि दैवान्नायाति यत्प्रियः। तद्वनागमदुःखार्ता विरहोत्कं

छितानुसा। यथा। किं कुर्मः प्रियया कया वितथया सख्या मनोहेजितः किं वा कारणमागसो रवे किमपि यन्नागागतो वल्लभः॥
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं दीर्घं निश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः॥ इति सा
श्चा विश्रान्ति मुत्तममध्यमाधमस्वरूपतः। चतुर्धिकाशीतिपुतेश नत्रयं न नायिकाभिदा नोस्यास्तेः॥ इह च
परस्त्रियो कन्यकान्योढे संकेतात् पूर्वं विरहोत्कण्ठिते पश्चाद्विदूषकादिना सहाभिसरन्त्यौ वा अभिसा
23 रिके। कुतो ऽपि संकेतमप्राप्ते नायके विप्रलब्धे इति त्र्यवस्थे ऽनयोः अस्वाधीनप्रियपोरवस्थान्तरा
योगादिति कश्चित्। कश्चिदन्योन्यसाकल्पमासां लक्षणं दृश्यते। यथा। न खलु वयममुष्य दानयो
ग्याः पिबति च पाति च यासलकोरहस्त्वं। विटविटपममुं ददस्व तस्यै भवतु यतः सदृशो चिराय योगः॥
तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः। ननु जनविदितैर्भवद्व्यलीकैश्चिर
परिपूरितमेव कर्णयुग्मं॥ इति गाहितवनीरूपाजघानस्फुरितमनोरमपक्ष्मकेसरेण॥ श्रवणनियमि २२
तेन कान्तमन्या सममसितांवुरुहेण चक्षुषा च॥ इयं वक्रोक्त्या परुषवचनेन कर्णोत्पलताडने न
धीरमध्यता। अधीरमध्यता धीरप्रगल्भताभिः संकीर्यते॥ अन्यत्राप्येवमुक्तौ इतरा अप्यासु सर्वा

2

नोक्ता विस्तरशङ्कया। ता नायिकाः। अथासामलंकाराः। यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः। अलंकारास्त
त्र भावहावहेलास्त्रयोऽङ्गजाः। शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता। औदार्यं धैर्यमित्येते सप्तैव स्युरय
त्नजाः। लीला विलासो विच्छित्तिर्विब्बोकः किलकिञ्चितं। मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः। विहृतं तप
नं मौग्ध्यं विक्षेपश्च कुतूहलं। हसितं चकितं केलिरित्यष्टादशसंख्यकाः। स्वभावजास्तु भावाद्या दश पुंसां भवन्त्य
पि। पूर्वे भावादयो धैर्यान्ता दश नायिकानामपि संभवन्ति। किं तु सर्वेऽप्यमी नायिकाश्रयाः एव विच्छित्तिविशेषं पुष्णन्ति। निर्वि
कारात्मके चित्ते भावः प्रथमविक्रिया। जन्मनः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः। यथा। स एव सुरभिः
कालः स एव मलयानिलः। सैवेयमबला किं तु मनोऽन्यदिव लक्ष्यते। अथ हावः। भ्रूनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः।
भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते। यथा। विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः। साचीकृता चा
रुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन। अथ हेला। हेलात्यन्तसमालक्ष्यविकारः स्यात्स एव तु। स एव भाव एव। यथा। त
ह से झत्ति पअट्टा सव्वंगविब्भमा सअला। संसयिदमुद्धभावा होई चिरं जह सहीणं पि। अथ शोभा। रूपयौवनलालित्यभोगा

ये रंगभूषणं । शोभा का । तत्रैव यौवनशोभा यथा । असंभृतं मंडनमंगयष्टेरनासवाख्यं करणं मदस्य । कामस्य पुष्पव्यति
रिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे । एवमन्यत्रापि । अथ कांतिः । सैव कांतिर्मन्मथाप्यायितद्युतिः । मन्मथोन्मे
षणाभिविस्तीर्णशोभैव कांतिरुच्यते । यथा नेत्रोत्सवं जनगं जनेत्यादि । अथ दीप्तिः । कांतिरेवातिविस्तीर्णा दीप्ति
रित्यभिधीयते । यथा मम चंद्रकलानाटिकायां चंद्रकलावर्णने । तारुण्यस्य विलासः समधिकलावण्यसंपदो हा
सः । धरणितलस्याभरणं युवजनमनसो वशीकरणं ॥ ॥ अथ माधुर्यं । सर्वावस्थाविशेषेषु माधुर्यं रमणीय
ता । यथा सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति । इयमधिकमनोज्ञा व २५
ल्कलेनापि तन्वी किमिव हि मधुराणां मंडनं नाकृतीनां । अथ प्रागल्भता । निःसाध्वसत्वं प्रागल्भ्यं । समाश्लि
ष्टा समाश्लेषैश्चुंबिता चुंबनैरपि । दृष्टा च दर्शनैः कांतं दासीकुर्वंति योषितः । अथौदार्यं । औदार्यं विनयः सदा ।
यथा न ब्रूते परुषां गिरं वितनुते न भ्रूयुगं भंगुरं नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि । कांता गर्भगृहे ग
वाक्षविवरव्यापारिताक्ष्या बहिः सख्या वक्त्रमभिप्रयच्छति परं पर्यश्रुणी लोचने । अथ धैर्यं । मुक्तात्मश्लाघना धैर्यं

मनोवृत्तिरचंचला। यथा-ज्वलतु गगने रात्रौ रात्रावखंडकलः शशी दहतु मदनः किंवा मृत्योः परेण विधास्यति। मम
तु दयितः श्लाघ्यस्तातो ऽजनन्यमलान्वया कुलममलिनं नत्वेवायं जनो न च जीवितं। अथ लीला। अंगैर्वेषैर
लंकारैः प्रेमभिर्वचनैरपि। प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः। यथा मृणालव्यालैर्यावेणीवंधकपर्दिनी। हरा
नुकारिणी पातु लीलया पार्वती जगत्। अथ विलासः। यानस्थानासनादीनां मुखनेत्रादिकर्मणां। विशेषस्तु वि
लासः स्यादिष्टसंदर्शनादिना। यथा। अत्रांतरे किमपि वाग्विभवातिवृत्तवैचित्र्यमुल्लसितविभ्रममायताक्ष्याः
तद्भूरिसात्त्विकविकारमपास्तधैर्यमाचार्यकं विजयि मान्मथमाविरासीत्। अथ विच्छित्तिः। स्तोकाप्याकल्परचना
विच्छित्तिः कांतिपोषकृत्। यथास्वच्छांभःस्नपनविधिविधौतमंगमोष्ठस्तांबूलद्युतिविशदो विलासिनीनां। वासश्च प्र
तनु विविक्तमस्त्वितीयानाकल्पो यदि कुसुमेषुणा न शून्यः। अथ विब्बोकः। विब्बोकस्त्वतिगर्वेण वस्तुनीष्टेप्यनादरः
यथा-यासां सत्यपि सद्गुणानुसरणे दोषानुरागो भृशं याः प्राणान्वरमर्पयंति न पुनः संपूर्णदृष्टिं प्रिये। अत्यंताभिमतेपि
वस्तुनि विधिर्यासां निषेधात्मकस्तास्त्वत्केलिषु दक्षिणा अपि सदा वामा जयंत्येव ताः। अथ किलकिंचितं। स्मितशुष्करुदि

तहसितत्रासक्रोधश्रमादीनां । सांकर्यं किलकिंचितमभीष्टतमसंगमादिजाद्धर्षात् । यथा पाणिरोधमविरोधितवांछं
भर्त्सनाश्च मधुरस्मितगर्भाः । कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितं च सुखेपि । अथ मोट्टायितं ॥ ॥ तद्भाव
नाभाविते चित्ते वल्लभस्य कथादिषु । मोट्टायितमिति प्राहुः कर्णकंडूयनादिकं । यथा । सुभग त्वत्कथारंभे कर्णकंडू
25 तिलालसा । उज्जृंभवदनांभोजा भिनत्त्यंगानि सांगना ॥ ॥ अथ कुट्टमितं ॥ ॥ केशस्तनाधरादीनां ग्रहे हर्षेपि सं
भ्रमात् । प्राहुः कुट्टमितं नेति शिरःकरविधूननं । यथा । पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरबिंबमभी
ष्टे । पर्यकूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण । अथ विभ्रमः ॥ ॥ त्वरया हर्षरागादेर्दयितागमना
दिषु । अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः । यथा · श्रुत्वायांतं बहिः कांतमसमाप्तविभूषणा २५
भालेंजनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥ ॥ अथ ललितं ॥ ॥ सुकुमारतयांगानां विन्यासो ललितं
भवेत् । यथा गुरुतरकलनूपुरानुनादं सुललितनर्तितवामपादपद्मा । इतरदनतिलोलमादधाना पदम
थ मन्मथमंदिरं जगाम ॥ ॥

अथ मदः। मदो विकारः सौभाग्ययौवनाद्यवलेपजः। यथा। मा गर्वमुद्वह कपोलतले चकास्ति कान्तस्वहस्तलिखिता मम
मञ्जरीति। अन्यापि किं सखि न भाजनमीदृशानां वैरी न चेत्तव भवति वेपथुरन्तरायः। अथ विहृतं। वक्तुकाले
प्यवचो व्रीड्याविष्कृतं मतं। यथा। दूरागते न कुशलं पृष्टा नो याचसामुया। किं चित्र। पयश्चलो नु नयने
तस्याः कथयांबभूवतुः सर्वं। अथ तपनं। तपनं प्रियविच्छेदे स्मरावेगोत्थचेष्टितं। यथा। श्वासान्मुञ्चति
भूतले विलुठति त्वन्मार्गमासा वते दीनं रोदिति विक्षिपत्यन रतः सोत्कंठमावल्लरीं। किंच। प्रा
णसमानकालितवतीस्वप्नेपि ते संगमे निद्रां वांछति न प्रयच्छति पुनर्दग्धो विधिस्तामपि। अथ
मौग्ध्यं। अज्ञानादिव यापृच्छा प्रतीतस्यापि वस्तुनः। वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्तद्वे
दिभिः। यथा। के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः। नाथ मत्कंकणन्यस्तं येषां मुक्ताफले
फलं। अथ विक्षेपः। भूषाणामर्धरचना वृथा विष्वगवेक्षणं। रहस्याख्यानमीषच्च विक्षेपो
दयितान्तिके। यथा। धम्मिल्लमर्धमुकुलं कलयति तिलकं तथा सकलं। किं विदधतिर हस्यं च
कितं विष्वग्विलोकनं तन्वी। अथ कुतूहलं। रम्यवस्तुसमालोके लोलता स्यात्कुतूहलं। यथा
प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव। उत्सृष्टलीलागतिरा ग

वासादलंकारकोपदर्शनतानन ॥ अथ हसितं । हसितं तु वृथाहासो यौवनोद्भेदसंभवः । यथा अकस्मादेव तन्वी
गी जहास यद्दियं पुनः । नूनं प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति ॥ अथ चकितं । कुतोपि दयितस्याग्रे
चकितं भयसंभ्रमः । यथा । त्रस्यन्ती चलशफरीविघट्टितोरूर्वामोरूरतिशयमाप विभ्रमस्य ॥ क्षुभ्यं
ति प्रसभमहो विनापि हेतोर्लीलाभिः किमु सति कारणे रमण्यः । अथ केलिः । [illegible] विलासे सह कांतेन
26 क्रीडितं केलिरुच्यते । यथा । व्यपोहितुं लोचनतो मुखानिलैरपारयंतं किल पुष्पजं रजः । पयोध
रेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी । अथ मुग्धा कन्यकायोरनुरागेंगितानि ।
दृष्ट्वा दर्शयति व्रीडां संमुखं नैव पश्यति । प्रच्छन्नं वा भ्रमंतं वातिक्रांतं प्रपश्यति प्रियं । बहुधा पृच्छ २६
मानापि मंदमंदमधोमुखी । सगद्गदस्वरं किंचित्प्रियेण [illegible] प्रायेण भाषते । अन्यैः प्रवर्तितां शश्व
त्सावधाना च तत्कथां । श्रुतो [illegible] प्रियेबालानुरागिणी ॥ अथ सकलानामपि नायिका
नामनुरागेंगितानि । [illegible] विनापि सखिभिर्धत्ते स्थाने प्रियस्य बहुमन्यते । विलोचनपथं चास्य
न गच्छत्यनलंकृता । कापि कुंतलसंव्यानसंयमव्यपदेशतः । बहुमूलं स्तनौ नाभिपंक

जंदर्शयेत्स्फुटं। आनंदयति वाग्भिः प्रियस्य परिपाचकान्। विश्वासितस्य स्य मित्रेषु बहुमानं करोति च। सु
खी मध्ये गुणाश्रुते स्वधनं प्रददाति च। सुप्ते स्वपिति दुखे स्य दुःखं धत्ते सुखे सुखं। हि स्मिता दृष्टि
पथे श्वस्त्रियेप श्यति दूरतः। आभाषते परिजनं संमुखस्वर विक्रियै। यत्किंचिदपि सवी स्य कु
ल्लते हसितं तथा। कर्णकंडूयनं तत्र कबरीमोक्षसंयमौ। जंभते स्फोटयत्यंगं बालमाश्लिष्य चुंब
ति। भाले तथा वयस्याया आरचयेत्तिलकक्रियां। अंगुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते। दश
ति स्वाधरं चापि ब्रूते प्रियमधोमुखी। न मुंचति च तं देशं नायको यत्र तिष्ठति। आगच्छति गृहं त
स्य कार्यव्याजेन केनचित्। दत्तं किमपि कांतेन धृत्वांगे बहु मन्यते। नि द्रष्यति तद्योगे वियोगे
मलिना कृशा। मन्यते बहु तच्छीलं न प्रियं मन्यतेऽप्रियं। प्रार्थयत्यल्पमूल्यानि सुप्ता न परि
वर्त्तते। विकारान्सात्त्विकानस्य संमुखी नाधिगच्छति।। भावस्नेहं तत्स्निग्ध मनुरक्तानितं विना\
एते यद्यपि कलज्ञानि चेष्टितानि नव स्त्रियाः।। मध्य व्रीडानि मध्या यथा स्वसमानत्रपा नात्र
न्य स्त्रियाः प्रागल्भ्याया स्पुर्वा रयो बितः। दिग्मात्रं यथा मम। अतिक गत मविमा

प्रियमलोकयंती व हंत दृष्टा वि। स्वरसनवरक्षत लस्तवमा विभुकृतने भुजामूलं। तथा। लेखप्रस्थापनैः। स्निग्धं
धवी क्षितैर्मृदुगोचितैः। दूतीसंप्रेषितैर्नार्या भावाभिव्यक्तिरिष्यते। दूत्यश्च। दूत्यः सखी नटी दासी धा
त्रेयी प्रतिवेशिका। बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा। कारुः रजकीप्रभृतिः। शिल्पि
नी चित्रकरादिस्त्री। आदिशब्दात् ताम्बूलिकगांधिकप्रभृतयः। तत्र सखी यथा। श्वासान्मु
ञ्चतीत्यादि। स्वयं दूती यथा मम। पथिक आसि त्रयो वि[illegible] अलकवी[illegible] सि[illegible] निता किमपणेनो। एत
मएं विवार[illegible] इह अच्छि घरे घरणसर[illegible]। एतासां नायिकाविषये नायकानाम
पि दूत्यो भवंति। दूतीगुणानाह। कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः। माधुर्यं न
र्मविज्ञानं वाग्मिता चेति तद्गुणाः। एता अपि यथौचित्यादुत्तमाधममध्यमाः। एतीः दूत्यः। अ
थ प्रतिनायकः। धीरोद्धतः पापकारी व्यसनी प्रतिनायकः। यथा रामस्य रावणः। अथोद्दीपन
विभावाः। उद्दीपनविभावास्ते रसमुद्दीपयंति ये। ते च। आलंबनस्य चेष्टाद्याः देशकाला
दयस्तथा। देशादीत्यादिशब्दात् [illegible] रूप [illegible] भूषणादयः। कालादीत्यादिशब्दाच्च चंद्रचंदनको

किलालापश्च भ्रमरसंकाशा इयः। तत्र चंद्रो यथा मम। करमुद्यम हेधर स्तनाग्रे गलितनमः पटलोंशुकेनिवेश्य। विकसितकुमुदेक्षणी वि-
चुंबत्याय मम रे प्रादिशोम्युखं सुधांशुः। योयस्य रसस्योद्दीपनविभावः स तस्य रूपनिरूपणेनावस्यते। अनुभावा उद्बुद्ध-
कारणैः स्वैस्वैर्बहिर्भावं प्रकाशयन्। लोकेयः कार्यरूपः सोनुभावः काव्यनाट्ययोः। यः खलु लोके सीतादेरामचंद्रादिभि-
स्वेरालीवलोद्दीपनकारणैः रामादेरुद्बुद्धं रत्यादिं बहिः प्रकाशयन् कार्यमित्युच्यते स काव्यनाट्ययोः पुनरनु-
भावः। कः पुनरसावित्याह। उक्ताः स्त्रीणामलंकाराः अंगजाश्च स्वभावजाः॥ तद्रूपाः सात्त्विका भावास्तथा
चेष्टापरा अपि॥ तद्रूपा अनुभावरूपाः। अत्र च यो यस्य रसस्यानुभावः स तत्स्वरूपवर्णनेवस्यते। तत्र सात्त्विका।
विकारैः सह संभूताः सात्त्विकाः परिकीर्तिताः। सत्त्वं नाम स्वात्मविश्रामकारी कश्चनांतरो धर्मः। स हि मात्रो-
द्रवत्तीते भिन्नाश्चाप्यनुभावतः। गोबलीवर्दन्यायेनेति विशेषः। के त इत्याह। स्तंभः स्वेदोथ रोमांचः स्वरभंगो
थ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥ तत्र स्तंभश्चेष्टाप्रतीघातो भयहर्षामयादिभिः। वपु-
र्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः। हर्षाद्भुतभयादिभ्यो रोमांचो रोमविक्रिया। मदसंमदहर्षादेर्वैस्वर्यं गद्-
गदं विदुः। रागरोषश्रमादिभ्यः कंपो गात्रस्य वेपथुः। विषादमदरोषादेर्वर्णान्यत्वं विवर्णता। अश्रु नेत्रोद्भवं वा-
रि क्रोधदुःखप्रहर्षजं। प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः। यथा मम। तनुस्पर्शादस्या दरमुकुलिते

हुं तनयने उदं चन्द्रो मां चंद्रजीतिजडतामंगमखिले। कपोलौघमार्द्रौ कुवमुपरनो प्रे। सविषयं मनः सांद्रानंदं स्फुरति द्रति तत्र
स्ल परमे। एवमन्यत्र। अथ व्यभिचारिणः। विशेषादाभिमुख्येन चरंतो व्यभिचारिणः॥ स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंश
च्च ते मताः। स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद्व्यभिचारिण उच्यं
ते। के ते इत्याह। निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहि
त्थाः। औत्सुक्योन्मादशंकास्मृतिमतिसहिता व्याधिसंत्रासलज्जाहर्षासूयाविषादाः सधृतिचपलता ग्ला
निचिंता वितर्काः। तत्र निर्वेदः। तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननं। दैन्यचिंताश्रुनिश्वासवैवर्ण्यो
च्छ्वसितादिकृत्। तत्र तत्त्वज्ञानान्निर्वेदो यथा। मृत्कुंभवालुकारंध्रपिधानरचनार्थिना। दाक्षिणावर्त २०
शंखोऽयं हंत चूर्णीकृतो मया। आवेगः संभ्रमस्तत्र वर्षजे पिंडितांगता। उत्पातजे स्रस्ततांगे धू
माद्याकुलताग्निजे। राजविद्रवजादेस्तु शस्त्रनागाभियोजनं॥ गजादेः स्तंभकंपादिः पांस्वाद्याकुलतानि
लात्। इष्टाद्धर्षाः शुचोऽनिष्टाद्दृष्टव्याश्चान्ये यथायथं। तत्र शत्रुजो यथा। अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य
भरताग्रजो यतः। क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकां॥ एवमन्यदूह्यं। अथ दैन्यं। दौर्गत्यादेरनौ

ङ्गस्य दैन्यं मलिनतादिकृत्॥ यथा॥ वृद्धोंधः पतिरेष मंचकगतः स्थूणावशेषं गृहं कालोभ्यर्णजलागमः कुशलिनी
वत्सस्य वार्त्तापि नो यत्नात्संचिततैलबिंदुघटिका भग्नेति पर्याकुला दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति॥ अथ श्र
मः॥ खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः॥ यथा॥ सद्यः पुरीपरिसरेपि शिरीषमृद्वी सीता जवात्त्रिचतुराणि पदा
नि गत्वा॥ गंतव्यमस्ति कियदित्यसकृद्ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारं॥ अथ मदः॥ संमोहनानंदसंभेदो मद्यो
पयोगजः॥ अमुना चोत्तमः शेते मध्यो हसति गायति॥ अधमप्रकृतिश्चापि परुषं वक्ति रोदिति॥ यथा॥ प्रातिभं
त्रिसरकेण गतानां वक्रवाक्यस्वनारमणीयः॥ गूढसंवितरहस्यः सहासः सुभ्रुवां प्रवर्त्तते परिहासः॥ अथ जड
ता॥ अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः॥ अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र॥ य
था मम कुवलयाश्वचरिते प्राकृतकाव्ये॥ एवारिअंतमुअहुअलेअ [illegible] पिदसजलमंथरादिट्ठं॥ आ
लेख्यअव्व ओपिअं विअक्खणेमत्तं संठिअउ अ समं॥ अथोग्रता॥ शौर्यापराधादिभवं भवेच्चंडत्वमुग्रता॥ तत्र स्वे
दशिरःकंपतर्जनाताडनादयः॥ यथा॥ प्रणयिसखीसलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पहननै
रपि ताम्यति यत्॥ वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्यकांडयमदंड एव भुजः॥ अथ मोहः॥ मोहो वि

चित्तताभीतिदुःखावेगापर्यचिंतनैः। मूर्छनागात्रपतनभ्रमणादर्शनादिकृत्। यथा। तीव्राभि[illegible]संगप्रभवे
न हृत्तिं मोहेन संस्तंभयतेंद्रियाणां। अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव। अथ वि
बोधः। निद्रापगमहेतुभ्यो विबोधश्चेतनागमः। जृंभांगभंगनयनमीलनांगावलोककृत्। यथा।
चिररतिपरिखेदप्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव प्रबुद्धाः। अपरिचलितगात्राः कु
र्वते न प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः। अथ स्वप्नः। स्वप्नो निद्रामुपेतस्य विष
यानुभवस्तु यः। कोपावेशभयग्लानिसुखदुःखादिकारकः। यथा। मामाकाशप्रणिहितभुजं नि
र्दयाश्लेषहेतोर्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु। पश्यंतीनां न खलु बहुशो न स्थलीदे
वतानां मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतंति। अथापस्मारः। मनःक्षेपस्त्वपस्मारः
ग्रहाद्यावेशनादिजः। भूपातकंपप्रस्वेदफेनलालादिकारकः। यथा। आश्लिष्टभूमिं रसिता २९
रमुच्चैर्लोलद्भुजाकारबृहत्तरंगं। फेनायमानं पतिमापगानामसावपस्मारिणमाशशंके। अथ गर्वः
गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः। अवज्ञासविलासांगदर्शनाविनयादिकृत्। य

था। यावत्तावद्भुवो यावदहं तावदन्यैः किं साधुभिः। यद्यानसिंहमस्त्रेरणसमत्वेन न सेत्स्यति। अथ मरणं। शरा-
द्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत्। यथा। राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी। गन्धवद्रुधिरचं-
दनोक्षिता जीवितेशवसतिं जगाम सा। अथालस्यं। आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्। यथा। न तथा
भूषयत्यङ्गं न तथा भाषते सखीं। जृम्भते मुहुरासीना बाला गर्भभरालसा। अथामर्षः। निन्दा-
क्षेपापमानादेरमर्षोऽभिनिविष्टता। नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत्। यथा। प्रायश्चित्तं चरिष्या-
मि पूज्यानां वो व्यतिक्रमात्। न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतं। अथ निद्रा। चेतःसंमीलनं
निद्रा श्रमक्लमादिजा। जृम्भाक्षिमीलनोच्छ्वासगात्रभङ्गादिकारणं। यथा। सार्थकानर्थकपदं
ब्रुवती मन्थराक्षरं। निद्रार्धमीलिताक्षी सा लिखितेवास्ति मे हृदि। अथावहित्था। भयगौरवलज्जादेर्हर्षाद्या-
कारगुप्तिरवहित्था। व्यापारान्तरसक्त्यन्यथाभाषणावलोकनादिकृत्। यथा। एवंवादिनि देवर्षौ पार्श्वे पितु-
रधोमुखी। लीलाकमलपत्राणि गणयामास पार्वती। अथौत्सुक्यं। इष्टानवाप्तेरौत्सुक्यं कालक्षेपास-
हिष्णुता। चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत्। यथा। यः कौमारहर इत्यादि। अत्र पञ्चकार्यप्रकाशका-
रणरसस्य प्राधान्यमनुक्त[illegible]द्रसनचर्मत्वाद्व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मंतव्यं।

अथोन्मादः। चित्तस्य भ्रममुन्मादः कामशोकभयादिभिः। अस्थानहासरुदितगीतप्रलपनादिकृत्। यथा मम
भ्रातर्द्विरेफ भवता भ्रमता समन्तात्प्राणाधिकप्रियतमा मम वीक्षिता किं। झंकारमनुभूयसमानेदं। ब्रूषे किमो
मिति सखे कथमाशु तन्मे किं किं व्यवस्यति कुतोस्ति च कीदृशीयं। अथ शंका। परक्रौर्यात्मदोषाद्यै
३० शंकानर्थस्य चिंतनं। वैवर्ण्यकंपवैस्वर्यपार्श्वालोकास्यशोषकृत्। यथा मम। प्राणेशेन प्रहितनख
रेष्वंगकेषु क्षपांते जातातंका रचयति चिरं चंदनालेपनानि। धत्ते लाक्षामसकृदधरे दत्तदंतावघा
तेक्षामांगी यं चकितमभितश्चक्षुषी विक्षिपंती। अथ स्मृतिः। सदृशज्ञानचिंताद्यैर्भ्रूसमुल्लास
नादिकृत्। स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते। यथा मम। मयि सकपटं किंचित्क्वापि प्रणीतवि ३०
लोचने किमपि नयनं प्राप्ते किंचिद्विजृंभिततारके। स्मृतिमुपगतामालीदृश्वासलज्जमवांचितकुवल
यदृशः स्मेरं स्मेरं स्मरामि तदाननं। अथ मतिः। नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः। स्मेरताधृ
तिसंतोषौ बहुमानश्च तत्कृताः। यथा। असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः। सतां

हिंसं देहपदेषु वस्तुषु प्रमाणमंतःकरणप्रवृत्तयः। अथ व्याधिः। व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कंपनादिकृ
त्। तत्र दाहमयत्वे भूम्याद्यादयः। शीतमयत्वे उत्कंपनादयः। स्पष्टमुदाहरणं। अथ त्रासः। निर्घातविद्युदुल्कादेस्त्रा
सः कंपादिकारकः। यथा परिस्फुरन्मीनविघट्टितोरवः सुरांगनास्त्रासविलोलदृष्टयः। उपाययुः कंपितपा
णिपल्लवाः सखीजनस्यापि विलोकनीयतां। अथ व्रीडा। धार्ष्ट्याभावो व्रीडा वदनानमनादिकृद्दुराचा
रात्। यथा मयि सकपटमित्यादि। अथ हर्षः। हर्षस्त्विष्टावाप्तेर्मनःप्रसादोश्रुगद्गदादिकरः। यथा समीक्ष्य पु
त्रस्य चिरात्मुखं पिता निधानकुंभस्य युवेव दुर्गतः। मुदा शरीरे प्रबभूव नात्मनः पयोधिरिंदूदयमूर्छितो
यथा। अथासूया। असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता। दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेंगितादि
कृत्। यथा। अथ तत्र पांडुतनयेन सदसि विहितं मधुद्विषः। मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि
मानिनां। अथ विषादः। उपायाभावजन्मा तु विषादः सत्त्वसंक्षयः। निश्वासोच्छ्वासहृत्तापसहायान्वेषणा
दिकृत्। यथा मम। एसा कुडिलघणेण चिउरकडप्पेण तुह णिबद्धा वेणी। मह सहि दारइ डसइ आअसजट्ठिव्व काल
उरइव्व हिअअं। अथ धृतिः। ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः। सौहित्यवचनोल्लाससहासप्रतिभादिकृत्।

कुतोऽदीनाक्षिपीडनां निजजनेनेव ध्वान्तशोणिमा हन्ते बालो कनकगरीयसीरपि यया दामुष्मिन् क्रीर्यते तनावः द्रव्यौघाः परिसंचिताः खलु
मया यस्याः कृते सांप्रतं नीवारांजलिनापि केवलमहो सेयं कृतार्था तनुः ॥ अथ चपलता मात्सर्यद्वेषरागादेश्चित्तस्यानव
स्थितिः । तत्र भर्त्सनपारुष्यस्वच्छंदाचरणादयः । यथा । अन्यासु तावदुपमर्दसहासु भृंग लोलं विनोदय मनः सुमनोल
३१ तासु । मुग्धामजातरजसं कलिकामकाले व्यालं कदर्थयसि किं नवमल्लिकायाः ॥ अथ ग्लानिः । रत्यायासमनस्ता
पक्षुत्पिपासादिसंभवा ग्लानिर्निःप्राणता कंपकार्श्यानुत्साहतादिकृत् । यथा । किसलयमिव मुग्धं बंधनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः । ग्लपयति परिपांडुक्षाममस्याः शरीरं शरदिज इव घर्मः केतकीगर्भपत्रं । अथ
चिंता । ध्यानं चिंता हितानाप्तेः शून्यताश्वासतापकृत् । यथा मम । कमलेण विसहिएण एसा जो अत्ती विरहिणीस
सिणं । करअलपल्हत्थमुही किं चिंतेसि सुमुहि अंतराहिदहिअआ । अथ वितर्कः । तर्को विचारः संदेहाद्भ्रूशिरों
गुलिनर्तकः । यथा । किं वक्ष्यति प्रियेत्यादि । एते च त्रयस्त्रिंशद् इति यदुक्तं तदुपलक्षणमित्याह । रसादयो व्यभिचारि २१
सस्युर्व्यभिचारिणः । तथाहि । शृंगारेऽनुद्भिद्यमानतया वस्तुनो नाद्भुतिरवस्थापि शक्यावाप्या । हासे पुनरुत्पद्यमानो व्य
भिचार्येव । व्यभिचारिलक्षणयोगात् । तदुक्तं । रसावस्थः परं भावः स्थायितां प्रतिपद्यत इति । तत्कुत्रस्थस्थायिनः कुत्र रसे सं
चारि इत्याह । शृंगारवीरयोर्हासो वीरे क्रोधस्तथा मतः । शांते जुगुप्सा कथिता व्यभिचारितया पुनः । इति बुद्धिभिः । अथ स्थायिभावः
इत्याद्यन्यत्समुन्नेयं स्वयं भावि = १

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोसौ भावः स्थायीति संमतः। तदुक्तं स्रक्सूत्रवृत्त्या भावानाम्
षामनुगामुकः। न तिरोधीयते स्थायी तैरसौ पुष्यते परमिति॥ ॥ तद्भेदानाह॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं
तथा। जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोपि च। रतिर्मनोनुकूलेर्थे मनसः प्रवणायितं। वागादिवैकृतैश्चेतो
विकासो हास इष्यते। प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते। रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भ
यं। दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा। विविधेषु पदार्थेषु लोकसीमातिवर्तिषु। विस्फारश्चेतसो
यस्तु स विस्मय उदाहृतः। शमो निरीहावस्थायां स्वात्मविश्रामजं सुखं। यथा मालतीमाधवे रतिः। लट
कमेलने हासः। रामायणे शोकः। महाभारते शमः। एवमन्येपि। एते ह्येतेषु अन्तरान्तरा उत्पद्यमानैस्तै
र्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव सहृदयानुभवसिद्धाः। किंच नानाभिनयसंबन्धा
न्भावयन्ति रसान्यतः। तस्माद्भावा अमी प्रोक्ताः स्थायिसंचारिसात्त्विकाः। यदुक्तं सुखदुःखादिभिर्भावै
र्भावस्तद्भावभावनं। अथ रसभेदानाह। शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुत इत्यष्टौ रसाः;

णा॥ तस्तथा मतः। तत्र शृङ्गारः। शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः। उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते।
परोढां वर्जयित्वात्र वेश्यां वाननुरागिणीं। आलंबनं नायिकास्युर्दक्षिणाद्याश्च नायकाः। चंद्रचंदनरोलंब
रुताद्युद्दीपनं मतं। भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः। त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारि
32 णः। स्थायिभावो रतिः श्यामवर्णोयं विष्णुदैवतः। यथा शून्यं वासगृहमित्यादि। अत्रोक्तस्वरूपः पति
रुक्तरूपा च वा आलंबनविभावौ शून्यं वासगृहमुद्दीपनविभावः चुंबनमनुभावः। लज्जाहासौ व्य
भिचारिणौ। एतैरभिव्यक्तः सहृदयरतिभावः शृंगाररूपरसतां भजते॥ ॥ तद्भेदावाह। विप्रलंभोथसं ३२
भोग इत्येष द्विविधो मतः। तत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलंभोसौ। अभीष्टं नायकं नायिकां
वा। स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात्। तत्र श्रवणाद्दर्शनाद्वापि मिथः संरूढरागा
योः। दशाविशेषो प्राप्तौ यः पूर्वरागः स उच्यते। श्रवणं तु भवेत्तत्र दूतवंदिसखीमुखात्। इंद्रजाले

यचित्रे च साक्षात्स्वप्ने च दर्शने । अभिलाषश्चिंतास्मृतिगुणकथनोद्वेगसंप्रलापाश्च । उन्मादोऽथ व्या
धिर्जडता मृतिरित्यत्र कामदशाः ॥ अभिलाषः स्पृहा चिंता प्राप्त्युपायादिचिंतनं । उन्मादश्चापरिच्छेदः
श्चेतनाचेतनेष्वपि । अलक्ष्यवाक्प्रलापः स्याच्चेतसो भ्रमणाद्भृशं । व्याधिस्तु दीर्घनिश्वास
पांडुताकृशतादयः । जडता हीनचेष्टात्वमंगानां मनसस्तथा । शेषं स्पष्टं । क्रमेणोदाहरणं । प्रेमा
र्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्म
यि । यास्वंतःकरणस्य बाह्यविषयव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानं
दसांद्रो लयः । अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषः । कथमीक्षे कुरंगा
क्षीं साक्षाल्लक्ष्मीं मनोभुवः । इति चिंताकुलः कांतो निद्रां नैति निशीथिनीं । अत्र कस्याश्चिन्नापि
कायाः इंद्रजालदर्शनेन प्ररूढरागस्य नायकस्य चिंता । इदं मम । मयि सकपटमित्यादौ नायकस्य स्मृतिः

नेत्रे खंजनगंजने इत्यादौ गुणकथनं। श्वासान्मुंचती इत्यादावुद्वेगः। त्रिभागशेषासु निशासु च क्षणं निमील्य
नेत्रे सहसा व्यबुध्यत। क्व नीलकंठ व्रजसीत्यलक्ष्यवागसत्यकंठार्पितबाहुबंधना। अत्र प्रलापः। भ्रात
र्द्विरेफेत्यादावुन्मादः। पांडुक्षामं वदनं सरसं हृदयं तवालसं च वपुः। आवेदयति नितांतं क्षेत्रियरो
33 गं सखि हृदंतः। अत्र व्याधिः। भिसिणीअलसअणीए णिहित्तं सव्वविणो च अलं अंगं। दीहो णीसा
सभरो एसो साहेदि जीविअं उदिपरं। अत्र जडता। इदमपरं रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते। जा
तप्रायं तु न ह्यवाच्यं चेतसाकांक्षितं तथा। वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः। आद्यं यथा। शेफा
लिकां विदलितामवलोक्य तन्वी प्राणान्कथंचिदपि धारयितुं प्रभूता। आकर्ण्य संप्रति रुतं चरणायु ३३
धानां किं वा भविष्यति न वेति तपस्विनी सा। द्वितीयं यथा। रोलंबाः परिपूरयंतु परितो झंकारकोलाहलैः
मंदं मंदमुपैतु चंदनवनीजातो नभस्वानपि। माद्यंतः कलयंतु चूतशिखरे केलीपिकाः पंचमं प्राणाः सत्व
रमश्मसारकठिना गच्छंतु गच्छंत्वमी। यमेतो। तृतीयं यथा। कादंबर्यां महाश्वेतापुंडरीकवृत्तांते। एवं च प्रका

रः करुणाविप्रलंभ इति षष्ठधा वक्ष्यामः। केचित्तु नयनप्रीतिः प्रथमं चित्तासंगस्ततोथ संकल्पः। निद्राछेदस्तनुता विषयनिवृत्तिस्त्रपा
नाशः। उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः। तत्र च आदौ वाच्यः स्त्रिया रागः पश्चात्पुंसस्तदिंगितैः। दृग
तान्तु क्रमानि यथा रत्नावल्यां सागरिकावत्सराजयोः। आदौ पुरुषानुरागसंभवे त्वप्येवमप्यधिकं हृदयंगमतामवगति। नी
ली कुसुंभमंजिष्ठापूर्वरागोपि च त्रिधा। न चातिशोभते यन्नापैति प्रेम मनोगतं। तन्नीलीरागमाख्याति यथा श्रीराम
सीतयोः। कुसुंभरागं तं प्राहुर्यदपैति च शोभते। मंजिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते। अथ मानः।। मानः कोपः स तु
द्वेधा प्रणयेर्ष्यासमुद्भवः। द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि। प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना।
द्वयोरिति नायकस्य नायिकायाश्च प्रणयमानोपि वर्णनीयः यथा। एकस्मिन्शयने पराङ्मुखतया वीतोत्तरं ताम्यतोरन्यो
न्यंहृदि संस्थितेप्यनुनये संरक्षतोर्गौरवं। दंपत्योः शनकैरपांगवलनान्मिश्रीभवच्चक्षुषोर्भग्नो मानकलिः सहासरभसव्या
वृत्तकंठग्रहः। पत्युरन्यप्रियासंगे दृष्टेथानुमिते श्रुते। ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा। उत्स्वप्नायितभोगांकगो
त्रस्खलनसंभवा। तत्र दृष्टे यथा। विनयति सुदृशो दृशः परागं प्रणयिनि कौसुममाननानिलेन। तदहितयुवतेरभी
क्ष्णमक्ष्णोर्द्वयमपि रोषरजोभिरापुपूरे। संभोगचिह्नेनानुमिते यथा। नवनखपदमंगं गोपयस्यंशुकेन स्थगयसि पुनरोष्ठं पाणि

नाद्ं तद्दृष्टं। प्रतिदिशमपरस्त्रीसंगशंसी विसर्पन्नवपरिमलगंधः केतकी वायरीतु। एवमन्यत्र। सामभेदौ च दानं च नत्युपेक्षे रसांतरे।
तदुपायषट्किं युर्या धीढ्यापामानिति क्रमात्। तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनं। दानं व्याजेन भूषादेः पादयोः पतनं नतिः।
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणं। रभसत्रासहर्षादेः कोपभ्रंशो रसांतरं। यथा नो वा दृक्ष्यप्रणत्यादि। अत्र द्विसामा
34 द्याः पंच स्पष्टं विताः रसांतरं तूह्यं। अथ प्रवासः। प्रवासो भिन्नदेशत्वं कार्याच्छापाच्च संभ्रमात्। तत्रांगचेलमालिन्यमेकवेणीध
रं शिरः। निःश्वासोच्छ्वासरुदितभूमिपातादि जायते। किंच अंगेष्वसौष्ठवं तापः पांडुता कृशतारुचिः। अधृतिः स्यादनालंबस्त
न्मयोन्मादमूर्च्छनाः। मृतिश्चेति क्रमाज्ज्ञेया दशास्मरदशा इह। अंगासौष्ठवमापत्तिस्तापस्तु विरहज्वरः। अरुचिर्वस्तुवैराग्यं स
र्वत्रारागिता धृतिः। अनालंबनता वापि शून्यतामनसः स्मृता। तन्मनस्तत्प्रकाशो हि बाह्याभ्यंतरतस्तथा। शेषं स्पष्टं। एकदेश
तो यथा ममतातपाहतनौ। वितानाभिस्त्रिमिते मनः कुरतले लीलाकपोलस्थली प्रत्यूषक्षणदेशपांडुवदने श्वासैकविन्यो धरः॥ २४
अंभः शीतलनपद्मिनीकिसलये नैमित्तिलापः शमंकोस्याः प्रार्थितदुर्लभोस्ति महते दीनाद्यवामीदृशी। भावीभवद्भूतइति
त्रिधा स्यात्तत्र कार्यजः। कार्यजस्य बुद्धिपूर्वकत्वात् त्रैविध्यं। तत्र भावी यथा मम। यामः सुंदरि याहि पांथ दयिते शोकं वृथा
मा कृथाः शोकस्त्वद्गमने कुतो मम ततो बाष्पं कथं मुंचसि। शीघ्रं न व्रजसीति मां गमयितुं कस्मादियं ते त्वरा भूयानस्य सह त्व
या जिगमिषोर्जीवस्य मे संभ्रमः। भवन्यथा अस्मानवलपेक्ष्य तं प्रियसखैरेवसेवेरजस्रं गतं धत्या नक्षणमासितं व्यवसि

तं व्यवसितं विरेनगं नूपुरः। यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्स
ज्यते तोऽभूत् यथा। चिंतामिस्त्रिमितमित्यादि। शापाद्यथा। नाज्ञासीः पादित्यादि। संभ्रमो दिव्यमानुषनिर्घातोल्कादिजः। यथा
विक्रमोर्वश्यां उर्वशीपुरूरवसोः। अत्र पूर्वरागोक्तानामभिलाषादीनां प्रोक्तानां चांगासौष्ठवादीनां उभयेषामप्यत्र
संभवेऽपि चिरंतनप्रसिध्या विविच्य प्रतिपादनं। अथ करुणः। यूनोरेकतरस्मिन् गतवति लोकांतरं लभ्ये विमनायते यदैकस्त
दा भवेत्करुणविप्रलंभाख्यः। यथा कादंबर्यां पुंडरीकमहाश्वेतावृत्तांते। पुनरलभ्ये शरीरांतरेण वा लभ्ये करुणाख्य एव रसः।
किं वात्राकाशसरस्वतीभाषणानंतरमेव श्रृंगारः। संगमप्रत्याशया रतेरुद्भवात्। प्रथमं तु करुण एव रसः इत्यभियुक्ता म
न्यंते। यश्चात्र संगमप्रत्याशानंतरमेव जायतो विप्रलंभश्रृंगारस्य प्रवासाख्यो भेद एवेति केचिदाहुः। तदन्ये म
रणरूपविशेषसंभवात्तद्भिन्नमपि मन्यंते। अथ संभोगः। दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। यत्रानुरक्ता
वन्योन्यं संभोगोऽयमुदाहृतः। आदिशब्दादन्योन्याधरपानचुंबनादयः। यथा शून्यं वासगृहमित्यादि। संख्यातु
मशक्यतया चुंबनपरिरंभणादिबहुभेदादयमेक एव धीरैः कथितः संभोगश्रृंगारः। तत्र स्यादृतुषट्कं चंद्रादि
त्योदयास्तमयः। जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः। अनुलेपनभूषाद्या वाच्यं सु

विमेध्यमन्यत्र। तथा च भरतः। यत्किंचिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं तत्सर्वं शृंगारेणोपमीयते। उपमीयते
उपयुज्यते। कथितश्चतुर्विधोऽसावानंतर्यात्तु पूर्वरागादेः। यदुक्तं। न विना विप्रलंभेन संभोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान्रागो विवर्द्धते इति। अत्र पूर्वरागानंतरसंभोगो यथा कुमारसंभवे पार्वतीपरमेश्व
35 रयोः। प्रवासानंतरसंभोगो यथा मम तातपादानां। क्षेमं ते ननु पक्ष्मलाक्षि किमु ते सत्रोरस्मम हं गदृष्टे एतादृक्कृशता
कुतस्तदहदुणो पुष्टं शरीरं कुतः। केनाहं पृथुला प्रिये प्रणयिनी देहस्य संक्षिप्तता लतः सुतनु क्वापि मे जरद्दृदः त्वयि मं
कुतोऽपृच्छसि। एवमन्यत्राप्यूह्यं। अथ हास्यः। विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्। हास्यो हासस्था
यिभावः श्वेतः प्रमथदैवतः। विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः। तमत्रालंबनं प्राहुस्तच्चेष्टोद्दीपनं ३५
मतं। अनुभावोऽक्षिसंकोचवदनस्मेरतादयः। निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः। ज्येष्ठानां
स्मितहसिते मध्यानां विहसितावहसिते। नीचानामपहसितं तथातिहसितं तदेष षड्भेदः। ईषद्विकासिनय
नं स्मितं स्यात्स्पंदिताधरं। किंचिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः। मधुरस्वरं विहसितं सांसशिरःकंपमव
हसितं। अपहसितं सास्राक्षं विक्षिप्तांगं भवत्यतिहसितं। यथा गुरोर्गिरः पंचदिनान्यधीत्य वेदांतशास्त्राणि दिन

त्रयेव । अमीसमाघ्रातवितर्कवादाः समागताः प्रोत्कटमपि अपादाः । अस्य नटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः । य
स्य हासः स चेत्क्वापि साक्षान्नैव निबध्यते । तथाप्येष विभावादिसामर्थ्यादुपलभ्यते । अभेदेन विभावादेः साधारण्या
त्प्रतीयते । सामाजिकैस्ततो हास्यरसोप्यनुभूयते । एवमन्येष्वपि रसेषु बोद्धव्यं । अथ करुणः । इष्टनाशादनि
ष्टाप्तेः करुणाख्यो रसो भवेत् । धीरैः कपोतवर्णोयं कथितो यमदैवतः । शोकोत्र स्थायिभावस्याच्छोच्यमा
लंबनं मतं । तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः । अनुभावो दैवनिंदाभूपातक्रंदितादयः । वैवर्ण्योच्छ्वासनि
श्वासस्तंभप्रलपनानि च । निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः । विषादजडतोन्मादचिंताद्या व्यभिचारि
णः । शोच्यं विनष्टबंधुप्रभृति । यथा मम राघवविलासे । विपिनेषु जटानिबंधनं तव चेदं क्व मनोहरं वपुः । अ
नयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकर्तनं । अत्र हि रामवनवासजनितशोकार्तस्य दशरथस्य निंदा । एवं ब
बंधुवियोगविभवनाशादावप्यूह्यं । परिपोषस्तु महाभारते स्त्रीपर्वणि बोद्धव्यः । अस्य करुणविप्रलंभा
द्भेदमाह । शोकस्थायितया भिन्नो विप्रलंभादयं रसः । विप्रलंभे रतिः स्थायी पुनः संभोगहेतुकः । अथ रौद्रः । रौ

द्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः। आलंबनमरिस्तत्र तच्चेष्टोद्दीपनं मतो। मुष्टिप्रहारपातनविकृत
छेदावदारणैश्चैव। संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा। भ्रूविभंगोष्ठनिर्दंशबाहुस्फोटनतर्जनाः। आ
त्मावदानकथनमायुधोत्क्षेपणानि च। अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः। उग्रतावेगरोमांचस्वे
दवेपथवो मदः। मोहामर्षादयस्त्वत्र भावास्स्युर्व्यभिचारिणः। यथा। कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
36 मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः
करोमि दिशां बलिं। अस्य युद्धवीराद्भेदमाह। रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः। अथ वीरः। उत्त ३६
मप्रकृतिर्वीर उत्साहस्थायिभावकः। महेंद्रदैवतो हेमवर्णोऽयं समुदाहृतः। आलंबनविभावास्तु विजेतव्या
दयो मताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः। अनुभावास्तु तत्र स्युः सहायान्वेषणादयः। सं
चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमांचाः। स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात्। स च वीरः
दानवीरो धर्मवीरो युद्धवीरो दयावीर इति चतुर्विधः। तत्र दानवीरो यथा परशुरामः। त्यागः सप्तसमुद्रमुद्रि

३४ ३.

नमहीनिर्व्याजदानावधिरिति । अत्र परशुरामस्य त्यागे उत्साहः । स्थायी भावः । संप्रदानभूतब्राह्मणैरालंबनविभा
वैरनुभावितेऽहर्षधृत्यादिभिः संचारिभिः पुष्टिं नीतो दानवीरतां भजते । धर्मवीरो यथा । युधिष्ठिरः । राज्यं च
वसु देहश्च भार्या भ्रातृसुताश्च यच्च लोके मम यावत्तद्धर्माय सदोद्यतं । युद्धवीरो यथा । रामचंद्रः । भो लंके
श्वर दीयतां जनकजा रामः स्वयं याचते कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद्गतं नैवं चेत्खर
दूषणत्रिशिरसां कंठासृजा पंकिलः पत्री नैष सहिष्यते मम धनुर्ज्याबंधबंधूकृतः । दयावीरो यथा जीमूत
वाहनः । शिरामुखैः स्यंदत एव रक्तमद्यापि देहे मम मांसमस्ति । तृप्तिं न पश्यामि तवापि तावत्किं भक्ष
णात्वं विरतो गरुत्मन् । एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः । अथ भयानकः । भयानको भ
यस्थायिभावः कालाधिदैवतः । स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः । यस्मादुत्पद्यते भीति
स्तदत्रालंबनं मतं । चेष्टा घोरतरा चास्य भवेदुद्दीपनं पुनः । अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभा

वदंशपुलकस्वेदरोमांचकंपादिकप्रेक्षणादयः। जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः। शंकापस्मारसंभ्रां
तिमृत्याद्या व्यभिचारिणः। यथा नष्टो वैवर्ण्यवरैरित्यादि। अथ बीभत्सः। जुगुप्सास्थायिभावस्तु बीभ
त्सः कथ्यते रसः। नीलवर्णो महाकालदैवतोयमुदाहृतः। दुर्गंधिमांसपिसितमेदांस्यालंबनंमतं। तत्रैव कृमि
पाताद्यमुद्दीपनमुदाहृतं। निष्ठीवनास्यवलननेत्रसंकोचनादयः। अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः।
37 मोहापस्मारआवेगव्याधिश्च मरणादयः। यथा उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि
मांसान्यंसस्फिक्पृष्ठपीडाद्यवयवसुलभान्युग्रपूतीनि दग्ध्वा। आर्तः पर्यस्तनेत्रः प्रकटितदशनः ३७
प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति। अथाद्भुतः। अद्भुतो विस्मय
स्थायीभावो गन्धर्वदैवतः। पीतवर्णो वस्तु लोकातिगमालंबनंमतं। गुणानां तस्य महिमा भवेदु
द्दीपनं पुनः। स्तंभस्वेदाथ रोमांचगद्गदस्वरसंभ्रमाः। तथा नेत्रविकासाद्या अनुभावाः प्रकी

त्रिंशाः। वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः। यथा दोर्दण्डांचितचंद्रशेखरधनुर्दंडावभंगोद्यतष्टंकार
ध्वनिरार्यबालचरितप्रस्तावनाडिंडिमः। द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदरभ्राम्यत्पिंडितचं
डिमा कथमहो नाद्यापि विश्राम्यति। अथ शान्तः। शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः। कुंदेंदुधवल
च्छायः श्रीनारायणदैवतः। अनित्यत्वादिनाशेषवस्तुनिःसारता तु या। परमात्मस्वरूपं वा तस्यालंबन
मिष्यते। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसंगाद्यास्तस्योद्दीपनरूपिणः। रोमांचा
द्याश्चानुभावास्तथा स्युर्व्यभिचारिणः। निर्वेदहर्षस्मरणमतिभूतदयादयः। यथा रथ्यान्तश्च
रतस्तथा धृतजरत्कंथालवस्याध्वगैः सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः। निर्व्याजीकृत
चित्सुधारससुदा निद्रायमाणस्य मे निःशंकः करटः कदा करपुटीभिक्षां विलुंठिष्यति। पुष्टि
श्च महाभारतादौ द्रष्टव्या। निरहंकाररूपत्वाद्दयावीरादिरेव नो। दयावीरादौ हि जीमूतवाहना
दावंतरा मलयवत्याद्यनुरागादेरंते च विद्याधरचक्रवर्तित्वाद्याप्तेर्दर्शनादहंकारोपशमो नोप

श्यता। शान्तश्च सर्वाकारेणाहंकारप्रशमनैकरूपत्वान्न तत्रोत्तमर्थयति। अतश्च नागानंदे शांतरसाश्रया
न्नहमपास्तं। ननु न यत्र दुःखं न सुखं न चिंता न द्वेषरागौ न च काचिदिच्छा। रसः स शांतः कथितो मु
नीन्द्रैः सर्वेषु भावेषु समप्रमाणः॥ इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिल
क्षणायां प्रादुर्भावात् तत्र च संचार्यादीनामभावात् कथं रसत्वमित्युच्यते। युक्तवियुक्तदशायामव
38 स्थितो यः शमः स एव यतः रसनीयमतिः तदस्मिन् संचार्यादिस्थितमपि न विरुद्धा। यच्चास्मिन् सुखाभा
वोऽप्युक्तस्तस्यायैषयिकसुखपरत्वान्निरतेयः॥ उक्तं हि। यच्च कामसुखं लोके यच्च दिव्यं महासुखं। तृष्णा
क्षयसुखस्यैते नार्हतः षोडशीं कलां॥ सर्वाकारमहंकाररहितत्वं व्रजंतीति चेत् न। अत्रोत्तमर्थवन्महति २९
दयावीरादयस्तदा। आदिशब्दाद्धर्मवीरदेवताविषयरतिप्रभृतयः। तत्र देवताविषयरतिर्यथा। कदाचा
राणस्यां मिहसुरधुनीरोधसि वसन् वसानः कौपीनं शिरसि निदधानोंऽजलिपुटं। अये गौरीनाथ त्रि
पुरहर शंभो त्रिनयन प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान्॥ स्फुरेच्चमत्कारितयावसाने च रसं

रसं विदुः । स्थायी वत्सलतास्नेहः पुत्राद्यालंबनं मतं । उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः । आलिंगनांगसंस्पर्श
शिरश्चुंबनमीक्षणं । पुलकानंदवाष्पाद्या अनुभावाः प्रकीर्तिताः । संचारिणोनिष्टशंकाहर्षगर्वादयो
मताः । पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः । उदाहरणं यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयाम
वलंब्य चांगुलिं । अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोर्भकः ॥ एषां रसानां परस्परं वि
रोधमाह । आद्यः करुणबीभत्सरौद्रवीरभयानकैः । भयानकेन करुणेनापि हास्यो विरोधभाक् । क
रुणो हास्यशृंगाररसाभ्यामपि तादृशः । रौद्रस्तु हास्यशृंगारभयानकरसैरपि । भयानकेन शांते
न तथा वीररसः स्मृतः । शृंगारवीररौद्राख्यहास्यशांतैर्भयानकः । शांतस्तु वीरशृंगाररौद्रहास्यभया
नकैः । शृंगारेण तु बीभत्स इत्याख्याता विरोधिता । आद्यः शृंगारः । एषां समावेशजकाशवद्यते ।
कुतोपि कारणात्क्वापि स्थिरतामुपयन्नपि । उन्मादादिर्न तु स्थायी पात्रे न स्थैर्यमेति यत् । यथा विक्र-
मोर्वश्यां चतुर्थेंके पुरूरवस उन्मादः । रसभावौ तदाभासौ भावस्य प्रशमोदयौ । संधिः शब-

नताचेतिसर्वेपिरसनाद्रसः। रसनं धर्मयोगित्वाद्भावादिष्वपि रसत्वमेवोपिचारिकमिति मतिआपः। भावादयस्तु यं
ते। संचारिणः। अथाष्टौ नानिर्देश्यादि विषयारतिः। उद्बुद्धमात्र स्थायी च भावइत्यभिधीयते। न भावहीनो
स्ति रसो न भावो रसवर्जितः परस्परकृता सिद्धिरनयो रसभावयोः। इत्युक्त दिशा परमालोचने यो
39 मविश्रान्तिस्थाने न रसेन सहैव वर्त्तमाना। अपि चाजानुगत विलास सहृत्तम्य स्पर्धदामालतो पत्र प्राधा
मेनाभिव्यक्ता व्यभिचारिणः देवमुनिगुरुनृपादिविषयारतिः। उद्बुद्धमात्रा विभावादिपरिपुष्ट
तया रसतामनापद्यमाना अस्थायी भावाभावशब्देनोच्यते। व्यभिचारी यथा। एवं ● यादिनिर्देशो
ःचित्यादि अप्राप्तहेत्वादेव विषयारतिर्यथा। हरिविरञ्चिविभास्कृ यासो नरकेजान्तरकान्तकप्र २९
कामे। अवधीरितशारदारविन्दौ चरणौ तेस्मरणो विचिन्तयामः। नपामि। मुनिविषयारतिर्यथा
या। विलोकनेनैव तवामुना मुने कृतः कृतार्थोस्मि निबर्हितांहसा। तथापि शुश्रूषुरहं
गरीयसी गिरोथवास्मयासिकेन तत्पूयते। राजविषयारतिर्यथा मम। त्वद्वाजिराजिनिर्धू

न्मूलीपल्लवं किल। न धत्ते शिरसा गंगां भूरिभारभिया हरः। एवमन्यत्र। स्त्रीषु यथा। हरस्फुरविं
चित्यादि तृतीये र्षश्लोके द्रौपद्या रंभई यां तु राशिः। उभयानुरागेऽपि च फलः। च रोष्टे व्यापारप्रमासक्ति
लोचनानि। अत्र पार्थितो विषया भगवतो रतिः। न नू ल्केपा न करसौ भूयविद्धि भावादीनां एको
बभासो रसः। तत्र संचारिणः पार्थस्याभावात् कथं प्राधान्येनाभिव्यक्तिः। उच्यते। यथा मरीचखंड
देरेकीभावे पिपानकेऽद्भुतैकः कस्यचित्क्वापि तथा संचारिणो रसे। अथ रसाभासभावाभासो।
अनौचित्यप्रवृत्तत्व आभासो रसभावयोः। अनौचित्यं चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्री
रहितत्वेन एकदेशयोगित्वोपलक्षणपरं बोध्यं। तच्च बालमुल्लत्वेप्येकदेशतः प्रदर्श्यते। उपना
यकसंस्थायां मुनिगुरुपत्नीगतायां च। बहुनायकनिष्ठायां रतौ तथानुभयनिष्ठायां। प्रति
नायकनिष्ठत्वे तद्वधमपात्रतिर्यगादिगते। शृंगारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे। शांते च ही

नन्निष्ठ गुर्वग्र्याले बने हासो। ब्रह्मैव चापुल्लाहे॥ अधमपात्रगतेन यथा वीरे। उत्तमपात्रगतत्वे भयानके इष्टे यमेव
मन्यत्रा तत्र रतेरुपनायकनिष्ठत्वे यथा मम। स्वामी मुग्धतरो वनं घनमिदं बालाहमेकाकिनी क्षोणीमा
वृणुते तमालमलिनच्छाया तमः संततिः। तन्मे सुंदर मुञ्च कृष्ण सहसा वर्त्मेति गोप्या गिरः श्रुत्वा तां प
रिरभ्य मन्मथकलासक्तो हरिः पातु नः। बहुनायकनिष्ठत्वे यथा। कान्तास्त एव भुवनत्रितयेपि मन्ये ये
40 षां कृते सुतनु पाण्डुरयं कपोलः। अनुभयनिष्ठत्वे यथा मालतीमाधवे नन्दनस्य मालत्यां। पशुभ्यां कुम
यनिष्ठत्वे पितृ पर्यमेकनिष्ठत्वे रतेराभासत्वमिति श्रीमल्लोचनकारः। तत्रोदाहरणं यथा रत्ना
वल्यां सागरिकाया अन्योन्यदर्शनागतः प्रागवत्स राजेरतिः। प्रतिनायकनिष्ठत्वे यथा। ४०
हयग्रीववधे महयग्रीवस्य जलक्रीडावर्णने। अधमपात्रगतत्वे यथा। जघनस्थलनद्ध
पत्रवल्ली गिरिमल्ली कुसुमाजिका मिमल्ली। अवचित्य गिरौ पुरोनिषण्णस्य कचानुल्ल
कुचयां चकार मल्ली। तिर्यग्गतत्वे यथा। मल्लीमल्लीषु पदं दधाना नायं व्यनेलरेवराहु मसा

ष्यंती। चंचद्विपंचीकलनादमंगी संगीतसंगी कुरुते स्म भंगी॥ आदिशब्दात्तापसादपः॥ रौद्राभासो य
था। रक्तोत्फुल्लविशाललोलनयनः कंपोत्तरांगो मुहुर्मुक्त्वा वर्णमपेतभीर्धृतिधनुर्बाणो हरेः
पश्यतः। अध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्तयन्नंसास्फोटपटुर्युधिष्ठिरम
सौ हंतुं प्रवृत्तोऽर्जुनः। भयानकरसाभासो यथा। अशक्नुवन्सोढुमधीरलोचनः सहस्र
रश्मेरिव यस्य दर्शनं। प्रविश्य हेमाद्रिगुहागृहांतरं निनाय बिभ्यद्दिवसानि कौशिकः॥ स्त्री
नीचविषयमेव हि भयं रसप्रकृतिः॥ एवमन्यत्र। भावाभासो लज्जादिके तु वेश्यादिविष
ये स्यात्॥ तस्य ष्टं। भावस्य शांताध्युदये संधिमिश्रितयोः क्रमात्॥ भावस्य शांतिरु
दयः संधिः शबलता तथा। क्रमेण यथा। सुतनु जहिहि मौनं पश्य पादानतं मां न ख
लु तव कदाचित्कोप एवंविधोऽभूत्। इति निगदति नाथे तिर्यगामीलिताक्ष्या नयनज

त्वमनत्वेमुक्तमुक्तेन किंचित्। अत्र बाष्पविमोचनेनेर्ष्याख्यस्य संचारिभावस्य शमः। चरणा
पतनप्रत्याख्यानप्रसादपराङ्मुखे निभृतकितवाचारेत्युक्ते रूषापरुषीकृते। अङ्गनि
रमणेऽतिनिश्वस्य श्लेषस्तनाहितहस्तया नयनसलिलच्छन्नाक्षिदृष्टिः सखीषु निपातिता। अ
त्र विषादस्योदयः। नयनयुगासेचनकं मानसवृत्त्यापि दुःप्रापं। रूपमिदं मदिरा
५। क्षपामदपतिहृदयं दुनोति च मे। अत्र हर्षविषादयोः संधिः। कार्कश्यं [illegible] नक्षमणाः शशा५
क्व च कुलं क्व भूयोऽपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखं। किं ४१
वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु यु
वा धन्योऽधरं धास्यति। अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिं
तानां शबलता॥ इति श्रीमहाविश्वनाथकविराजकृतौ साहित्यदर्पणे रसभावनिरूपणो

नाम तृतीयः परिच्छेदः ॥३॥ अथ काव्यभेदानाह । काव्यं ध्वनिर्गुणीभूतव्यंग्यं वेति द्विधा मतं । तत्र । वाच्यातिशयिनि व्यं-
ग्ये ध्वनिस्तत्काव्यमुत्तमं । वाच्यादधिकचमत्कारिणि व्यंग्येऽर्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं का-
व्यं । भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ । अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्य-
श्च । तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः । लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधि-
तस्वरूपं विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अत एव वाच्यं विवक्षितमन्यपरं व्यंग्यनिष्ठं । अत्र
हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यंग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य । अभिधामूलस्य बहुवि-
षयतया पश्चान्निर्देशः । अविवक्षितवाच्यस्य भेदावाह । अर्थान्तरसंक्रमिते वाच्येऽत्यन्ततिरस्कृते
अविवक्षितवाच्यो हि ध्वनिर्द्वैधामिति ऋच्छति । अविवक्षितवाच्यो नाम ध्वनिः अर्थान्तरसंक्रमितवा-
च्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । तत्र स्वयमनुपपद्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परि-
णमति । तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसंक्रमितवाच्यत्वं । यथा । कदली क

करत्नी करभः करभः करिराजकरः करिराजकरः। भुवनत्रितयेऽपि विभर्ति तुलामिदमूरुयुगं न चमूरुदृशः। अत्र
द्वितीयचतुर्थपादस्थिताः शब्दाः सामान्यकदल्यादिरूपे मुख्यार्थे बाधिताः जाड्यादिरूपगुणविशिष्टकदल्यादिरूपम
र्थं बोधयन्ति जाड्याद्यतिशयश्च व्यंग्यः। यत्र पुनः स्वार्थं सर्वथा परित्यज्यार्थान्तरे परिणमति तत्र मुख्यार्थस्या
त्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वं। यथा निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते। अत्रान्धशब्दो मु
ख्यार्थे बाधिते अप्रकाशरूपमर्थं बोधयति अप्रकाशातिशयश्च व्यंग्यः। अन्धत्वाप्रकाशत्वयोः सामान्य
विशेषभावाभावान्नार्थान्तरसंक्रमितवाच्यत्वं। भम धम्मिअ वीसद्धो सो सुणहो अज्ज मारिओ देण गो
लाणइ कच्छकुडंगवासिणा दरिअसिंहेण। इत्यत्र भ्रम धार्मिकेत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमा ४२
नतया भ्रमणनिषेधे पर्यवस्यतीति विपरीतलक्षणाशंका न कार्या। यत्र खलु विधिनिषेधावुत्पद्यमानावे
व निषेधविध्योः पर्यवस्यतस्तत्रैव तदवसरः। यत्र पुनः प्रकरणादिपर्यालोचनेन विधिनिषेधयोर्निषेधवि
धी अवगम्येते तत्र ध्वनित्वमेव। तदुक्तं। क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनं। पूर्वत्र लक्ष

तैवस्याद्युत्तर अभिधेयवस्तु- अत्राद्ये मुख्यार्थस्यार्थान्तरे संक्रमणं प्रवेशो न तु तिरोभावः। अत एवाजहत्स्वार्था लक्षणा।
द्वितीये तु स्वार्थस्यात्यन्ततिरस्कृतत्वाज्जहत्स्वार्था। विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः। असंलक्ष्यक्रमो य-
त्र व्यंग्यो लक्ष्यक्रमस्तथा। विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यंग्यः संलक्ष्यक्रमव्यंग्यश्चेति द्वि-
विधः। तत्राद्यो रसभावादिरेक एवात्र गण्यते। एकोऽपि भेदोऽनन्तत्वात्संख्येयस्तस्य नैव यत्। उक्तस्वरूपो रसभावादिर-
संलक्ष्यक्रमः। अत्र व्यंग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात्क्रमोऽवश्यमस्ति किंतूत्पलपत्रशतव्यतिभे-
भेदवल्लाघवान्न संलक्ष्यते। एषु चैकस्यापि भेदस्यानन्तत्वात्संख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यंग्यध्वनि-
र्नाम काव्यमेकभेदमेवोक्तं। तथाह्येकस्यैव शृंगारस्यैकोऽपि संभोगरूपो भेदः परस्परालिंगनाधरपानचु-
म्बनादिभेदात्प्रत्येकं च विभावादिवैचित्र्यात्संख्यातुमशक्यः का गणनानन्तानां सर्वेषां। शब्दार्थोभयशक्त्युत्थे व्यंग्ये-
नुस्वानसंनिभे। ध्वनिर्लक्ष्यक्रमव्यंग्यस्त्रिविधः कथितो बुधैः। क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यंग्यस्तस्य
शब्दशक्त्युद्भवत्वेनार्थशक्त्युद्भवत्वेनोभयशक्त्युद्भवत्वेन च त्रैविध्यात्संलक्ष्यक्रमव्यंग्यनाम्नो ध्वनेः काव्यस्या-
पि त्रैविध्यं। तत्र वस्त्वलंकाररूपशब्दशक्त्युद्भवो द्विधा। अलंकारशब्दस्य पृथगुपादानादनलंकारं वस्तु

मात्रंगम्यते।तत्रवस्तुरूपःशब्दशक्त्युद्भवोव्यंग्योयथा।पंथिअणएत्थसत्थरमत्थिमणंपत्थरत्थलेगा
मेउण्णअपओहरंपेक्खिऊणजइवससिताववससु।अत्रसत्थरादिशब्दशक्त्याययदिउपभोगक्षमोसि
तदास्वेतिव्यज्यते।अलंकाररूपोयथा।दुर्गालंघितइत्यादि।अत्रप्राकरणिकस्यउमानाममहादे
43 वीवल्लभस्यभानुदेवनृपतेर्वर्णनेद्वितीयार्थसूचितमप्राकरणिकस्यपार्वतीवल्लभस्यवर्णनम
संबद्धमाप्रसांक्तादितीश्वरभानुदेवयोरुपमानोपमेयभावश्चकल्प्यते।तदत्रउमावल्लभइवेत्युप
मालंकारोव्यंग्यः।यथावा।अमितःसमितःप्राप्तैरुत्कर्षैर्हर्षदप्रभो।अहितःसहितःसाधुयशो
भिरसतामसि।अत्रामितइत्यादावपिशब्दाभावादविरोधाभासोव्यंग्यः।व्यंग्यस्यालंकारस्यालंकार्य
त्वेपिब्राह्मणश्रमणन्यायेनालंकारत्वमुपचर्यते।वस्तुवालंकृतिर्वेतिद्विधार्थसंभवीस्वतः।क ४३
वेःप्रौढोक्तिसिद्धोवातन्निबद्धस्यवेतिषड्।षड्भिस्तैर्व्यंजमानोपिवस्त्वलंकाररू[illegible]पकः।
अर्थशक्त्युद्भवोव्यंग्योयातिद्वादशभेदताम्।स्वतःसंभवीऔचित्याद्बहिरपिसंभाव्यमानः।प्रौढो

तथा सिंहेन सोपि चिंतितः। न त्वत्क्रमेण यथा दृष्टिं देयालिवेशिनि क्षेपमित्याप्यस्य स्फुट देवस्य सिंहाये
णास्य शिशोः पिता न चिरस्थाः कोपीरपः पश्यति। एकाकिन्यपि यामिन्दूरमितः स्थितस्तमाला
कुलं नीरं ध्यास्तनुमालिखंतु जठरच्छिदानलयं थयः। अनेन स्थलः संभाविना वस्कमात्रेण तत्प्रति
पादिका या भाविपरपुरुषाप्तभोगजनरक्षतादिगोपनरूपं वस्कमात्रं व्यज्यते। दिशि मंदायते तेजो
दक्षिणस्यां रवेरपि। तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे। अनेन स्थलः स्यमयविनावस्त
ना रविते जसो रघुप्रतापोधिक इति व्यतिरेकालंकारो व्यज्यते। आपातत नमसुंदूरा दूरिहृ
तपराक्रमः। वलोवलोकयामास मातंगमिव केसरी। अत्रोपमालंकाररूपेण स्थलः संभावि
नार्थेन बलदेवः प्राणेनवेरमुदारिणाकृयं करिष्यतीति वस्तु व्यज्यते। गाढकांलदशानक्षतव्य
थासंकटादरिव धूनस्पपः। ओष्ठविद्रुमदलोन्यमोचयन्निर्दशन्नु चिरुषा निजाधरं।

अत्र स्वतन्त्रसंभविनाविरोधात्लेकारेण पूर्वश्लोकनिर्दिष्टस्य शत्रवो व्यापादिताश्चेति समुच्चयात्लेकारो व्यंग्यः।
सज्जेहि सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खसहे। अहिणवसहआरमुहे णवपल्लव
पत्तले अणंगस्स सरे। अत्र वसन्तः शरकारः कामो धन्वी युवतयो लक्ष्यं पुष्पाणि शराइ
ति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवन्मदनविजृम्भणारूपं वस्तु व्यनक्ति। रजनीषु विम
लभानोः करजालेन प्रकाशितं वीर। धवलयति भुवनमण्डलमखिलं तव कीर्त्तिः संततिः सत
तम्। अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्त्तिसंततेश्चन्द्रकरजालादधिककालोज्वलप्रका
शकत्वेन व्यतिरेकालंकारो व्यंग्यः। दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः। मणिव्या
जेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः। अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलंकारेण भविष्य
द्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते। धम्मिल्ले नवमल्लिकासमुदयो हस्ते सितांभोरुहं ४८
हारः कण्ठतटे पयोधरयुगे श्रीखण्डलेपो घनः। एकोऽपि त्रिकलिंगभूमितिलक त्वत्कीर्त्तिरा

शिर्षपीनानामंडनलांपुरंदरपुरीवामभ्रूयांचिग्रहे। अत्रकविप्रौढोक्तिसिद्धेनरूपकालंकारेण भूमिस्थो
पिस्वर्गस्मिन्नामुपकारंकरोतीतिविभावनालंकारोव्यज्यते। शिखरिणीकनुनामाकयचिरंकिमभि
धानमसावकरोत्तपः। सुमुखियेपेनतवाधरपाटलंदशतिबिंबफलंशुककशावकः। अत्रानेनकविनि
बद्धस्यचित्कामिनः प्रौढोक्तिरूपेणावस्तुनातवाधरःपुष्पातिशयजन्म इतियत्नःप्रतीयते सुतीर्थ
मगेकोटिसंख्यलमुपेतमदनाशुकैः। वसंतेपंचतात्म ताःपंचतासीद्वियोगिनां। अत्रक
विनिबद्धवक्तृप्रौढोक्तिसिद्धेनशराणां कोटिसंख्यात्वप्राप्त्यानिश्चितवियोगिमरणेनव
स्तुनाशराणांचताः शरान्विमुच्यवियोगिनः म्रितेवेत्युत्प्रेक्षाव्यज्यते। मालतीमुकुलेभा
तिमुञ्जन्नात्रमधुव्रतः। प्रायेणपंचबाणस्यशंखसंशयमाहरयन्निव। अत्रकविनिबद्धवक्तृप्रौ
ढोक्तिसिद्धेनोत्प्रेक्षालंकारेणकामस्याप्यमुन्मायककालःप्राप्तस्तत्कथंमानंनमुंचसीतिवस्तुव्य
ज्यते। महिलासहस्सभरिएतुहहिअएसुहसा अमअंतो। अणुदिणमणण्णकम्मा अंगंतणुअंपि

तत्पुटे ई। अत्रामानीति कविनिबद्धप्रौढोक्तिसिद्धेन काव्यलिंगालंकारेण तनोस्तनूकरणेन च हृदये न वर्त्तत इति वि
रोधोत्प्रेक्षालंकारो व्यज्यते । न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता । अतः कविनिबद्धवक्तृप्रौढोक्तिः
कविप्रौढोक्तेरधिकं सहृदयचमत्कारिणीति पृथक् प्रतिपादिता । एषु चालंकृतिव्यंजनस्थले
ष्विति जन्मन्नमधुश्रतन्नप्रयाणे पंचबाणस्य शरं समापदयन्निव । अत्र कविनिबद्धवक्तृप्रौढोक्ति
सिद्धेनोत्प्रेक्षालंकारेण कामस्यायमुन्मापककालः प्राप्तस्तत्कथं मानेन मुंचसीति वस्तु व्यज्यते ।
रूपकोत्प्रेक्षाव्यतिरेकादिमात्रस्य प्राधान्यं सहृदयसंवेद्यं । ननु रूपादीनामित्यलंकृतेरेव मु
ख्यत्वं । एकः शब्दार्थशक्त्युत्थ उभयशक्त्युद्भवे व्यंग्ये एको ध्वनेर्भेदः । यथा । हिममुक्तचन्द्ररुचिरः ८५
सपद्मको मदयन्द्विजाञ्जनितमीनकेतनः । अभवत्प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चि
राय माधवः । कृष्णः माधवो वसंत इवेत्युपमालंकारो व्यंग्यः । एवं च व्यंग्यभेदादेव व्यंजकानां काव्या
नां भेदः । तदष्टादशधा ध्वनिः । अविवक्षितवाच्यो । अर्थान्तरसंक्रमितवाच्यो अत्यंततिरस्कृतवा

यत्स्येति द्विविधः। विवक्षितान्यपरवाच्यस्त्व असंलक्ष्यक्रमव्यंग्यत्वेनैकः। संलक्ष्यक्रमव्यंग्यतयाप्यत्वे
न च शब्दार्थोभयशक्तिमूलतया पंचदशेत्यष्टादशभेदो ध्वनिः। एषु च वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पद
वाक्ययोः। अर्थान्तरसंक्रमितवाच्यो ध्वनिः पदगतो यथा। धन्यः स एव तरुणो नयने तस्यैव नयने च। युव
जनमोहनविद्याभवितेयं यस्य संमुखे सुमुखी। अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टनयन
परः। वाक्यगतो यथा। त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति। आत्मीयां मतिमाधाय स्थितिमत्र वि
धेहि तत्। अत्र प्रतिपाद्यस्य संमुखीनत्वादेव लभ्ये प्रतिपाद्यत्वे त्वामिति पुनर्वचनमन्यव्यावृत्तिविशि
ष्टत्वं तदर्थं लक्षयति। एवं वच्मीत्यनेनैव तत्कर्तरि लभ्ये अस्मीति पुनर्वचनं। तथा विदुषां समुदाय इत्यनेनैव
वक्तुः प्रतिपादने सिद्धे वच्मीति पुनर्वचनमुपदिशामीति वचनं विशेषरूपमर्थं बोधयति। एतानि च लक्षि
तानि च लक्षितानि स्वातिशयं व्यंजयंति। एतेन मम वचनं तवात्यंतं हितं तदवश्यमेव कर्तव्यमित्यभिप्रायः
तदेवमयं वाक्यार्थगतार्थान्तरसंक्रमितवाच्यो ध्वनिः। अत्यंततिरस्कृतवाच्यः पदगतो यथा। निःश्वा

सोऽयमिवेत्यादि। वाक्यगतो यथा॰ उपकृतं बहु तत्रेति। अन्येषां वाक्यगतत्वेऽदाहृते पदगतत्वे यथा। लावण्यं तदसौ
कान्तिस्तद्रूपं स वचः क्रमः। तदा सुधास्पदमभूदधुना तु ज्वरो महान्॥ अत्र लावण्यादीनां तादृशस्वभावैकगो
चरताव्यंजकानां तदादिपदानामेव प्राधान्यमन्येषां तदुपकारकत्वमिति तन्मूल एव ध्वनिव्यपदेशः। तदु
क्तं ध्वनिकृता। एकावयवसंस्थेन भूषणेनेव कामिनी। पदद्योत्येन सुकवेर्ध्वनिना भाति भारती। एवं भावादि
46 ष्वप्यूह्यं। भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः। कस्य नानन्दनिस्यन्दं विदधाति सदागमः। अत्र सदाग
मशब्दः सन्निहितं उपनायकं प्रति शास्त्रार्थमभिदधानः सतः पुरुषस्यागमः इति वस्तु व्यनक्ति। न तु सदा
गमः सदागम इवेति कथमुपमाध्वनिः। सदागमशब्दयोरुपमानोपमेयभावाविवक्षणात्। रहस्यसंगो ४६
पनार्थमेव हि — र्थपदोपादाने। प्रकरणादिपदपर्यालोचने सच्छास्त्रस्यापि संबद्धत्वात्। अनन्यसाधार
णीधीर्धृतारिवलवसुंधरः। राजते कोऽपि जगति स राजा पुरुषोत्तमः। पुरुषश्रेष्ठः पुरुषोत्तम इवेत्युपमाध्वनिः।
अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ। सायं स्नानमुपासितं मलयजेनांगं समालेपितं यातोऽस्ताचलमौलिमंब

रमणीः विस्रब्धमन्त्रगतिः। अत्राश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासि
तुं। अत्र स्वतः संभविना वस्तुना कृतपरपुरुषपरिचयास्क्लान्तासीति व्यज्यते। न त्वधुना क्लान्तासि न तु पूर्वं कदाचिदपि
तवैवं क्लमो दृष्ट इति बोधयतोऽधुनापदस्यैवेतरोत्कर्षः तदधुनापदस्यैव न पदान्तरापेक्षया वैशिष्ट्यं। तदप्राप्तमहादुःख
विलीनाशेषपातका तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा। चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणं। निरु
च्छ्वासतया मुक्तिं गतान्या गोपकन्यका। अत्राशेषपदचयपदप्रभावादनेकजन्मभोग्यदुःखसुकृतफलराशि
तादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमिति शब्दयोः क्रियापदप्रतीतिरशेषचयप
दद्वयद्योत्या। अत्र व्यंजकस्य श्लोको छो क्षिमं तरणसंभावितत्वात्स्वतः संभविना। पश्यं त्वसंख्यपथगां त्वद्दानजल
वाहिनीं। देव त्रिपथगात्मानं गोपयत्युग्रमूर्धनि। अत्र पश्यन्तीति कविप्रौढोक्तिसिद्धेन काव्यलिंगालंकारेण
न केवलमन्येषां दातारः त्वावसदृशा इति व्यतिरेकालंकारो वाक्यपदव्यंग्यः। एवमन्येष्वप्यर्थशक्तिमूलसंलक्ष्यक्र
मभेदेषूदाहार्यं। तदेवं ध्वनेः पूर्वोक्ते षट्त्रिंशद्भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यंग्यो वाक्यमात्रेणैव व्यक्तः।
अन्ये पुनः सप्तदश वाक्यपदयोरिति चतुस्त्रिंशदिति पंचत्रिंशद्भेदाः। प्रबंधेऽपि महावाक्यैरर्थशक्त्युद्भवो ध्वनिः। प्रबंधो

महावाक्ये। अनंतरोक्तैकादशभेदोऽर्थशक्त्युत्थः। यथा महाभारते गृध्रगोमायुसंवादे। अलं स्थित्वा श्मशानेऽ

स्मिन्गृध्रगोमायुसंकुले। न चेह जीवितः कश्चित्कालधर्ममुपागतः॥ इति दिवसे शवदाहनिषेधार्थं गृध्रस्य श्मशाने मृतं

बालमुपादाय तिष्ठतां दिवसेऽत्र परित्यज्य गमनमभिष्टं। आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत सांप्रतं। बहुविघ्नो

मुहूर्तोऽयं जीवेदपि कदाचन। अमुं कनकवर्णाभं बालमप्राप्तयौवनं। गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशं-

47 किताः। इति निशि समर्थस्य गोमायोर्दिवसपरित्यागो नाभिलषित इति वाक्यसमूहेन द्योत्यते। अत्र स्व-

तःसंभवी व्यंजकः। एवमन्येष्वेकादशभेदेषूदाहार्यं। एवं काव्यार्थव्यंजकत्वे उदाहृते। लक्ष्यार्थस्य यथा-

निःशेषच्युतचंदनमित्यादि। व्यंग्यार्थस्य यथा। उअणिच्चलणिप्फंदेत्यादि। अनयोः स्वतःसंभविनौ लक्ष्य ५०

व्यंग्यार्थौ व्यंजकौ। एवमन्येष्वेकादशभेदेषूदाहार्यं। पदांशवर्णरचनाप्रबंधेष्वस्फुटक्रमः। असंलक्ष्यक्र-

मव्यंग्यो ध्वनिः। तत्र पदांशः प्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः। यथा- चलापांगां दृष्टिं स्पृशसि

बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मृदु कर्णांतिकचरः। करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं व

यं त सान्येषाम्मधुकुसुमहतास्त्वं खलु कृती। अत्र हता इति न पुनर्दुःखं प्राप्नवंत इति हन्त्र कृतेः। मुहुरंगुलिसंवृता
धरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामं। मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुंबितं तु। अत्र
तु इति निपातस्यानुपातव्यंजकत्वं। न्यक्कारो ह्ययमेव मे यदरय इत्यादावरय इति बहुवचनस्यात्रैवेति सर्व
नाम्नः निहंतीति जीवतीति तिङः। अहो इत्यव्ययस्य। ग्रामटिकेति कृत्तद्धितस्य। भुजैरिति ब
हुवचनस्य व्यंजकत्वं। आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा नासाग्रे नयनं तदेतदपरं यच्चैकतानं
मनः। मौनं चेदमिदं च शून्यमधुना यद्विश्वमाभाति ते तत्- पाः सखि योगिनी किमसि भोः किं वा वियोगि
न्यसि। अत्राहार इति विषयसप्तम्याः। समस्तेति परेति विशेषणस्य। मौनं चेदमिति प्रत्यक्षपरामर्शिनः
सर्वनाम्नः। आभातीत्युपसर्गस्य। सखीति प्रणयसंस्मरणस्य। असि भो इति सोल्लासस्य। किं वेत्युत्तरपक्ष
दार्ढ्यसूचकस्य। असीति वर्तमानापदेशस्य तत्तद्विशेषव्यंजकत्वं सहृदयवेद्यं। वर्णरचनयोरुदाहरिष्यते। प्रबंधे यथा।

महाभारते शान्तः। रामायणे करुणः। मालतीमाधवरत्नावल्यादौ [redacted]ः। एवमन्यत्र। तदेवमेकपञ्चाशद्भेदास्तस्य ध्व
नेर्मताः। संकरेण त्रिरूपेण संसृष्ट्या चाप्यनेकधा। दिङ्मात्रमुदाहृयते। अभ्युन्नतस्तनयुगं तरलायताक्षी द्वारि
स्थिता तदुपयानमहोत्सवाय। सा पूर्णकुम्भनवनीरजतोरणस्रक्संभारमंगलमयत्नकृतं विधत्ते। अत्र स्तना
वेव पूर्णकुम्भौ दृष्टय एव नीरजतोरणस्रज इति रूपकध्वनिरसध्वन्योरेकाश्रयानुप्रवेशः संकरः। धिन्वेत्यप
58 मूनिमदमूर्च्छदलिध्वनीतिधूताध्वनीनहृदयानि मधोर्दिनानि। निस्तन्द्रचन्द्रवदनावदनारविंदसौर
भ्यसौहृदसगर्वसमीरणानि। अत्रैतानि प्रेमादिलक्षणामूलध्वनीनां संसृष्टिः॥ ॥ अथ गुणीभूतव्यंग्यं
अपरं तु गुणीभूतव्यंग्यं वाच्यादनुत्तमे व्यंग्ये। अपरं काव्यं। अनुत्तमत्वं न्यूनतया साम्येन च संभवति ५०
तत्रस्यादितरांगं काक्षिप्तं च वाच्यसिद्ध्यंगं। संदिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढं।
व्यंग्यमसुंदरमेवं भेदास्तस्योदिता अष्टौ। अपरस्य रसादेरंगं। रसादिव्यंग्यं यथा। अयं स र
सनोत्कर्षी पीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः। [redacted]

अत्र शृंगारः करुणस्यांगं। मनोऽन्ते तोषणायिनीमनुनेतुकामः स्वचेतसे न्यसागरस्योत्कण्ठितकर्णतापः हा
हा कष्टं नु भवतोऽरिपुरराजधानीप्रासादसंतुतिषु तिष्ठन्तिका मिलोकः। अत्रौत्सुक्यं [illegible] त्रासः संधिसं
स्फुरितस्य वक्रणस्य राज्ञ विषपरतावैभोगः। जनस्थाने [illegible] तंके नकमगातलक्ष्मीधिनैयावचोवैदेहीति
प्रतिपदमुदश्रुप्रलपितं। कृतालेकाभर्तुर्वदनपरिपाटीषु [illegible] त्वं कुशलत्वसुता
नत्वधिगता। अत्रामलत्वं मयाप्रासेमि त्यवचने पिशब्दशक्तेरेव [illegible] वचने [illegible] न
नुसादृश्यहेतुकताद्रात्म्यारोपिता भाविः कुर्वता लक्षोपमन्यपाकृतीतेन वाच्येसादृश्ये वाक्यार्था
च योपपादकलयांगतोनीतावाक्याक्षिप्तिसेय थामभ्रामिकोरयशालेसमरेनकोपातद्दुःशालस्य
रुचिरेनपिनामपुरसः। से चूर्णपामिगदयानसुयोधनोरूसंचीकरोतुभवतां [illegible] पतिः [illegible]
त्यादि नात्र अत्र म भ्रा[illegible] वंगंवाच्यस्य निषेधस्य सहभावेनैवहि[illegible] तां दीपयन्नौदसीरं ध्रमेषड्याल

न्निसर्वतः। प्रतापस्तवराजेन्द्र वैरिवंशदवानलः। अत्रान्वयस्य वेणुत्वारोपणरूपो व्यंग्यः। प्रतापस्य दा
वानलत्वारोपसिद्ध्यंगो। हरस्तु किंचिदित्यादौ विलोचनव्यापारचुंबनाभिलाषकोः आद्यान्ये
संदेहः। ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यस्तथा मित्रमन्यथा दुर्मनाय
५१ ते। अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यंग्यस्य वाच्यस्य च समं प्राधान्यं। संध्यौ
सर्वस्वहरणं विग्रहे प्राणनिग्रहः। अलावदीननृपतौ न संधिर्न च विग्रहः। अत्रालावदी
ननृपतौ दानमानादिमंतरेणान्यो न प्रशमोपाय इति व्यंग्यं स्फुटत्वान्नामपि
ज्ञातिव्यस्फुटं। अनेन लोकगुरुणा सतां धर्मोपदेशिना। अहं व्रतवती स्वैरमुक्तेन किम ४९
तःपरं। अत्र प्रतीयमानोपि शाक्यस्तिर्यक्रूपो। बलात्कारोपभोगस्फुटतया वाच्या
यमान इत्यस्फुटं। वाणीरकुडंगुड्डीणसउणिकोलाहलं कुणंतीए। घरकम्मवावडाए
वहुए सीअंति अंगाइं। अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्यात्सीदंत्यंगा

नीतिनाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुंदरः। किंच योदीपकतुल्ययोगितादिषूपमानोलं
कारो व्यंग्यः स गुणीभूतव्यंग्य एव। काव्यस्य दीपकादिषु रूपेनैव चमत्कारविधायित्वात्। तदु
क्तं ध्वनिकृता। अलंकारान्तरस्यापि प्रतीतौ यत्र भासते। तत्परत्वं न काव्यस्य नासौ मार्गो ध्व
नेर्मतः। यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विप्रतिपत्तिः। सोपि गुणीभूतव्यंग्यः।
यथा। दृष्ट्या केशवगोपरागहृतया किंचिन्न दृष्टं मया तेनात्र स्खलितास्मि नाथ पतितां
किं नाम नालंबसे। एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिर्गोप्यैवं गदितः सलेश
मवताद्गोष्ठे हरिर्वश्चिरं। अत्र गोपरागादिशब्दानां गोपरागा इत्यादिव्यंग्यार्थानां लेशमि
पदेन स्फुटतयावभासः ४ सलेशं इति पदस्य परित्यागेन पुनर्ध्वनिरेव। किंच यत्र
वस्त्वलंकाररसादिव्यंग्यानां रसाद्यंतरे गुणीभावस्तत्र प्राधान्येन कृत एव काव्यव्यवहारः।

तदुक्तं तेनैवं प्रकारोयं गुणीभूतव्यंग्येपि ध्वनिरूपता। यत्र रसादितात्पर्यपर्यालोचनया पुनर्भवति। यत्र
तु। यत्रोन्मादानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः। संध्याभ्रमं प्राप्तवतामकांडेप्य
नंगनेपथ्यविधिं व्यधत्त। इत्यादौ रसादीनामंगरीष्टतां तादिवस्तुमात्रे गतत्वं तत्र तेषामथवा
50 तात्पर्यविषयत्वेपि तैरेव गुणीभूतैः काव्यव्यवहारः। तदुक्तमस्मत्सगोत्रकविपंडितमुख्यश्री
चंडीदासपादैः। काव्यस्याखंडबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावा
वभासस्तावन्नानुभूयते। पश्चात्तु प्रकरणादिपर्यालोचनया भवन्नप्यसौ न काव्यव्यपदे ५०
शं हंतुमीशस्तस्यास्वादमात्रायत्तत्वादिति। केचित्तु चित्राख्यं तृतीयं काव्यभेदमिच्छंति तदाहुः।
शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतमिति। तन्न। यदि ह्यव्यंग्यत्वेन व्यंग्याभावस्तदा तस्य का
काव्यत्वमेव नास्तीति प्रागेवोक्तं। ईषद्व्यंग्यत्वमिति चेत् किं नामेषद्व्यंग्यत्वं। आस्वा

घव्यंग्यसमानास्वाद्यव्यंग्यत्वेवा। आद्येऽप्यचीनभेदयोरंतःपातः। द्वितीये तु काव्यत्वं। यदि चा
नास्वाद्यत्वं तदाक्षुद्रमेव तदाक्षुद्रमेव दोकृतायाम नास्वाद्यत्वात्। तदुक्तं ध्वनिकृता। प्र
धानस्वैगुणभावाभ्यां। व्यंग्यस्यैवं व्यवस्थितेः। गुणोकाव्यतदन्यत्र चित्रमभिधीयते इति॥ ॥
इति श्रीसाहित्यदर्पणे ध्वनिगुणीभूतव्यंग्याख्यकाव्यभेदनिरूपणो नाम चतुर्थः परिच्छेदः।
॥ अथकेयमभिनवाव्यंजनानामवृत्तिरित्युच्यते। वृत्तीनांविश्रांतेरभिधातात्पर्यलक्षणा
ख्यानां। अंगीकार्यातुर्यावृत्तिर्बोधेरसादीनां। अभिधायाः संकेतितार्थबोधनविरतायाः
नवस्तुत्वंकारसादिव्यंग्यावबोधनेक्षमत्वं। नचसंकेतितोरसादिः। नहिविभावाद्यभि
धानमेवतदभिधानं। तस्यतदेकरूप्यानंगीकारात्। यत्रस्वशब्देनाभिधानंतत्रप्रत्यु
तदोषएववक्ष्यामः। क्वचिच्चशृंगारादिरसोयमित्यादौस्वशब्दाभिधानेपिनतत्प्रतीतिः।

तस्य प्रकाशानन्दरूपत्वात्। अभिहितान्वयवादिभिरंगीकृतात्तात्पर्याख्यावृत्तिरपि संसर्गमात्रबोधनेन परिक्षीणा नैव व्यं
ग्यस्य बोधिनी। यदुक्तं विदग्धैः। सोऽयमिषोरिव दीर्घदीर्घो व्यापार इति। यच्च ध्वनिनोक्तं। तात्पर्याव्यतिरेका
च्च व्यंजकत्वस्य न ध्वनिः। यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतमिति। तयोरुपरिशब्दबुद्धिकर्मणां विरम्य
व्यापाराभाव इति विरम्यव्यापाराभाववादिभिरेव पातञ्जीयो दंडः। एवं किमिति लक्षणाप्युपास्या दीर्घदीर्घा
51 भिधाव्यापारेणापि तदर्थबोधसिद्धेः। ब्राह्मण पुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ हर्षशोकादीनामपि न वाच्य
त्वात्। यत्तु नरूढे पौरुषेयमपौरुषेयं वा सर्वमेव वाक्यं कार्यपरमतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्। ततश्च ५१
काव्यशब्दानां निरतिशयसुखास्वाद एव कार्यत्वेनावधार्यते। यत्परः शब्दः स शब्दार्थ इति न्यायात्। तत्र प्र
ष्टव्यं। किमिदं यत्परत्वं नाम - तदर्थत्वं वा - तात्पर्यवृत्त्या बोधकत्वं वा - आद्ये न विवादः। व्यंग्यत्वेपि तदर्थतानपायात्
द्वितीये तु केयं तात्पर्याख्या वृत्तिः। अभिहितान्वयवादिभिरंगीकृता वा - तदन्या वा - आद्ये दत्तमेवोत्तरं। द्वितीये तु
नाममात्रे विवादः। तन्मतेपि तुरीयवृत्तिसिद्धेः। न च व्यंजकत्वं युगपदेव तात्पर्यशक्त्याभिधावादिसंसर्गस्य रसादेश्च प्रकाशनमिति तन्न

तयोर्हेतुफलभावोऽङ्गीकार्यः। यदाह मुनिः। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। सहभावे च कुतः सव्ये
तरविषाणयोरिव कार्यकारणभावः। गंगायां घोष इत्यादौ तटाद्यर्थबोधनविरहिताया श्च लक्षणायाः कुतः शीतल
त्वादिपावनत्वादिव्यंग्यबोधकता। तेन तुरीया वृत्तिरुपास्यैवेति निर्विवादमेतत्। किं च बोद्धृस्वरूपसंख्यानि
मित्तकार्यप्रतीतिकालानाम्। आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यंग्यः। वाच्यार्थव्यंग्यार्थयोर्हि प
दतदर्थमात्रज्ञाननिपुणैः सहृदयैरेव संवेद्यतया बोद्धृभेदः। भ्रम धार्मिक इत्यादौ क्वचिद्वाच्ये विधिरूपे नि
षेधरूपतया। कथितं निषेत्यादौ निषिद्धरूपे विधिरूपतया च स्वरूपभेदः। गतोऽस्तमर्क इत्यादौ वाच्योऽर्थ एक ए
व प्रतीयते व्यंग्यस्तु तत्तद्बोद्ध्रादिभेदात् क्वचित्कान्तमभिसरेति गावो निवध्यन्तामिति नायकस्यापमागम
नावसर इति संतापोऽधुना नास्तीत्यादिरूपेणानेक इति संख्याभेदः। वाच्योऽर्थः शब्दोच्चारणमात्रेण वेद्यः एष
तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेदः। प्रतीतिमात्रचमत्कारकरणाच्च कार्यभेदः। केवलरूपतया चमत्कारित
या च प्रतीतिभेदः। पूर्वपश्चाद्भावेन कालभेदः। शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसंघटनाश्रयत्वेन चाश्रयभेदः। क
स्स ण व होइ रोसो दट्ठूण पिआइ सव्वणं अहरं। सब्भमरपउमग्घाइणि वारिअवामे सहसु एण्हिं। इति सखीतत्त्वज्ञकान्तगतत्वेन वि

षयभेदः। तस्मान्नाभिधेयप एव व्यंग्यः। तथा ब्रागसत्वाद्रसादेर्नो बोधिके लक्षणाभिधे। किं च मुख्यार्थबाधस्याविर
हादपि लक्षणा। न बोधिकेति शेषः। नहि कोपि रसः नामक्षत्याघाताद्रतो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोस्ति
यमिमे लक्षणाभिधे बोधयेतां। किं च यत्रां गायां घोष इत्यादावुपात्तशब्दार्थानां तुच्छपक्षे वान्वयोनुपपत्त्या बाध्य
ते तत्र हि लक्षणायाः प्रवेशः। यदुक्तं न्यायकुसुमांजलावुदयनाचार्यैः। श्रुतान्वयादनाकांक्षं न वाक्यं ह्यन्य
दिच्छति। पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन संगतिः। न पुनः शून्यं वा सगर्हमित्यादौ मुख्यार्थबाधः। यदि गांग
52 यां घोष इत्यादौ प्रयोजने लक्ष्यं स्यात्तीरस्य मुख्यार्थत्वं बाधितं यस्यात्। तस्यापि लक्ष्यतया प्रयोजनां
तरमित्यनवस्थापातः। न चापि प्रयोजनविशिष्ट एव तीरे लक्षणा। विषयतत्प्रयोजनयोः युगपत्प्रतीत्यनभ्युपगमात् ५२
नीलादिसंवेदनानंतरमेव हि ज्ञातता या अनुव्यवसायस्य वा असंभवः। नानुमानं रसादीनां व्यंग्यानां बोधनक्ष
मं। आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः। व्यक्तिविवेककारेण हि यापि विभावादिभ्यो रसादीनां प्रतीतिः सानु
मान एवांतर्भवति। विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते। ते हि रसादीनां भावानां का
रणकार्यसहकारिभूतास्तान्नुमापयंत एव रसादीनिष्पादयंति। त एव हि प्रतीयमाना आस्वादपद

तैरेव हि प्रतीयमाना आस्वादपदवीं गताः संतो रसा इत्युच्यन्ते इत्यवश्यं भवितव्यं प्रातीतिकमः।
केवलमनुभावितया सो न लक्ष्यते। यतो यद्यप्यभिव्यक्तिरत्र भङ्गिति यदुक्तं तत्र प्रष्टव्यं।
किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिरागादिज्ञानमेव रसत्वेनाभि-
मतं भवतः। तद्भावनया भावकैर्भाव्यमानोपस्थापकाशानन्दो वा। आद्ये न विवादः। किं-
तु रामादिरागादिज्ञानं रससंज्ञया नोच्यते अस्माभिरित्ययं विशेषः। द्वितीये पक्षे व्याप्ति-
ग्रहणाभावाद्धेतोराभासतया असिद्ध एवायं पक्षोक्तं तेनैव नामत्रयपक्षे विविधानां विभा-
वानुभावसात्त्विकसंचारिणामभिधानमभिनयो वा न च तत्त्रयं गमकं रसादि रसा। विभा-
वादिभिस्तु व्याप्तिग्रहे व्याप्तिः। पक्षधर्मता च। अन्यथा यायंति तदभिव्यक्तौ यः सामग्रीशक्ति
वैधर्म्येऽनुमितिपक्षेनो गमकत्वेन संमतेति। इदमपि नमो विरुद्धं। न ह्येवंविधा

गतीतितस्मादत्रैनास्माकमभिमताकिंतुस्वप्रकाशमात्रविश्रांतःसोऽऽनंदनिर्भरः।तेनात्र
सिसाधयिषितादर्थादर्थांतरसाधनताद्धेतोराभासतापत्तेः।अमयमिश्च इत्यादौप्र
तीयमानेवस्तु।जलकेलिकरतकरतलमुक्तपुनःपिहितराधिकावदनः।अगदंवस्तुको
53 कप्रनोविघटनेसंघटनकौतुकीहरिः।इत्यादौचरूपकालंकारादयोनुमेयाइति।
तथाहि।अनुमानेनामपक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टाल्लिंगाल्लिंगि
निज्ञानं।ततश्चावाच्यादसंबद्धोर्थस्तावन्नप्रतीयते।अन्यथातिप्रसंगःस्यादितिवा ५८
च्यवाचकयोरर्थयोः कश्चित्संबंधोस्त्येव।ततश्चवाचकोर्थोलिंगंवाच्यश्च
लिंगी।वाचकस्यचार्थस्यपक्षसत्त्वंमेयनिबद्धमेव।सपक्षसत्त्वविपक्षव्यावृत्तत्वेऽ

निवद्धः अपि सामर्थ्यादिवसेयः। तस्मादत्र पदार्थाद्[illegible]लिंगरूपाल्लिंगिनो व्यंग्यार्थस्यावगमस्तदनुमा
नमेव पर्यवस्यतीति तन्न। तथा हि भ्रम धार्मिक इत्यादौ गृहे श्वनिवृत्त्या विहितं भ्रमणं गोदा
वरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयतीति। यदुक्तं व्यंजकत्वं तत्रानैकान्तिको हेतुः। भीरोरपि गुरोः
प्रभोर्वा निर्देशेन प्रियानुरागेण वा गमनस्य संभवात्। पुंश्चल्या वचनं प्रामाणिकं न वेति संदिग्धा
सिद्धश्च। जलकेलीस्नानस्य आत्मदर्शनाद्दर्शनाभ्यां चक्रवाकविघटनसंघटनकारी संवे
द्व इवेति। अनुमितिरेव पर्यवसितिरिति न वाच्यं। तत्रास्य काव्यवैकान्याहा। एवं विधोऽर्थ एवं वि
धार्थबोधकः। एवं विधार्थत्वात्। तावन्नैवं तन्नैवं इत्याभाससमानयोगक्षेमो हेतुः।
एवं विधार्थत्वादिति हेतुना एवं विधानि शार्थस्वरूपाद्युपपत्तेः। तथा यत्र [illegible] तदादि
हेप्रतिवाशाखनिदर्शनमिहाप्यस्मत्कृहे त्यादौ न लगं पीनोस्तनमितियानमेकाकितया।

स्त्रोतोगमनं तद्रूपाः परकामुकोपभोगस्य लिंगिनो लिंगमित्युच्यते। तत्रास्येशाभिहितेन स्वकांतस्नेहेनापि सं
भवतीत्यनैकांतिको हेतुः। यद्वनिःशेषच्युतचंदनमित्यादौ दूत्यास्तत्कामुकोपभोगोनुमीयते-तत्किं प्रतिपाद्य
याहृत्यात्तत्कालसंनिहितैर्वान्यैः कृतकार्याव्याप्त्यभावनाया सहृदयैः। आद्यपक्षे निर्विवादः। तृतीये तु तथा
54 विधाभिप्रायविरहस्थले व्यभिचारः। ननु वक्त्राद्यवस्थासहकृतत्वेन विशेष्यो हेतुरिति न वाच्यं। ए
वंविधव्याप्त्यानुसंधानस्याभावात्। किं चैवंविधानां काव्यानां कविप्रतिभामात्रजन्मनां प्रामा
ण्याभावश्यकत्वेन संदिग्धासिद्धत्वं। हेतो व्यक्तिवादिनाबाध्यमपदसहायानामेवैषां व्यंजकत्व
मुक्तं। तेन तत्कांतस्याधमत्वे प्रामाणिकत्वे नवेत्यपि कथमनुमानं। एतेनार्थापत्तिवेद्यत्वमपि व्यंग्यानां ५८
मपास्तं। अर्थापत्तेरपि पूर्वप्रसिद्धव्याप्तिबलोपजीव्यैव प्रवृत्तेः। यथा यो जीवति स कुत्राप्यव
तिष्ठते जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्र इत्यादिके। किं च वस्त्रविक्रयादौ तर्जनीतोलनेन
दशसंख्यावत्सूचनबुद्धिवेद्योप्ययं न भवति। सूचनबुद्धेरपि संकेतादिलौकिकप्रमाणसापेक्षत्वेना

नुमानप्रकारत्वांगीकारात्। घनसंस्कारजन्यत्वाद्रसादिबुद्धिः स्मृतिरिति केचित्। तन्न। तत्रापि प्रत्य
भिज्ञायामेवैकांतिकत्वाद्धेतोराभासता। दुर्गालंघितेत्यादौ द्वितीयार्थो नास्त्येवेति यदु
क्तं महिमभट्टेन तदनुभवसिद्धमपलपतो गजनिमीलिकैव। तदेवमनुभवसिद्धस्य तस्य र
सादिलक्षणार्थस्याशक्यापलापतया तत्तच्छब्दाद्यन्वयव्यतिरेकानुविधायितया चा
दिवृत्तित्रयाबोध्यतया चतुरीयापारो निरूप्य स्येवेति सिद्धं। इयं च व्याप्त्याद्यनुसंधानं विना
पि भवतीत्यखिलं निर्मलं। तत्किं नामिकेयं वृत्तिरित्युच्यते। सा चेयं व्यंजनानाम वृत्तिरित्युच्य
ते बुधैः। रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः। एतद्विविच्योक्तं रसनिरूपणावसर इति।
॥ इति श्रीमद्विश्वनाथकविराजकृतौ साहित्यदर्पणे व्यंजनस्थापनो नाम पंचमः परि
च्छेदः॥५॥ एवं ध्वनिगुणीभूतव्यंग्यत्वेन काव्यस्य भेदद्वयमुक्तौ पुनर्दृश्यश्रव्यत्वेन

प्रदर्शयमाह। दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतं। दृश्यं तत्राभिनेयं तस्य रूपकसंज्ञा
हेतुमाह। तद्रूपारोपात्तु रूपकं। तद्दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमित्यु
च्यते। कोसावभिनय इत्याह। भवेदभिनयोवस्थानुकारः स चतुर्विधः। आंगि
55 कोवाचिकश्चैवमाहार्यः सात्विकस्तथा। अंगैर्दर्शितो आंगिकः। वाचा कविरचिता
काव्यनाटकादिषु कृतो वाचिकः। आहार्यो हारकेयूरकिरीटादिविभूषणैः। सात्वि
कः सात्विकैर्भावैर्भाविकेन विभावितः। नटैर्वागंगादिभी रामादियुधिष्ठिरादीना ५५
मवस्थानुकरणमभिनयः। रूपकभेदानाह। नाटकमथ प्रकरणं भाणव्यायोगस
मवकारडिमाः। ईहामृगांकवीथ्यः प्रहसनमिति रूपकाणि दश। किंचनाटिका
त्रोटकं गोष्ठी सट्टकं नाट्यरासकं। प्रस्थानोल्लाप्यकाव्यानि प्रेंखणं रासकं तथा।

संलापकं श्रीगदितं शिल्पकं च विलासिका । दुर्मल्लिका प्रकरणी हल्लीसो भाणिकेति च । अष्टादश प्राहुरुपरूपकाणि मनी
षिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतं । सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणां च । तत्र-नाटकं ख्या
तवृत्तं स्यात् पंचसंधिसमन्वितं । विला——दिगुणवद्युक्तं नानाविभूतिभिः । सुख ×धुप× दुःखसमुद्भूति नानारसनि
रंतरं । पंचादिका दशपरास्तत्रांकाः परिकीर्तिताः । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योथ दिव्यादिव्यो
वा गुणवान्नायको मतः । एक एव भवेदंगी शृंगारो वीर एव वा । अंगमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः । चत्वारः
पंच वा मुख्याः कार्यव्यापृतपूरुषाः । गोपुच्छाग्रसमाग्रं तु बंधनं तस्य कीर्तितं । ख्यातं रामायणादिप्रसिद्धं वृ
त्तं यथा रामचरितादि । संधयो वक्ष्यंते । नानाविभूतियुक्तमिति महासहायं । सुखदुःखसमुद्भवत्वं रामयुधिष्ठिरादि
वृत्तांतेष्वभिव्यक्तं । राजर्षयो दुष्यंतादयः । दिव्याः श्रीकृष्णादयः । दिव्यादिव्यो यो दिव्योप्यात्मनि नराभिमा
नी यथा श्रीरामः । गोपुच्छाग्रसमाग्रमिति । क्रमेणांकाः सूक्ष्माः कर्तव्या इति केचित् । अन्ये त्वाहुः । यथा गोपुच्छे
केचिद्वालाः सूक्ष्माः केचिद्दीर्घास्तथेह कानिचित्कार्याणि मुखसंधौ समाप्तानि कानिचित्प्रतिमुखे । एवमन्येष्व

पि क्वापि विदितिः। प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः। भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः। विच्छिन्नावान्तरैकार्थः
किंचित्संलग्नबिन्दुकः। युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च। नानाविधानसंयुक्तो नातिप्रचु
रपद्यवान्। आवश्यकानां कार्याणामविरोधाद्विनिर्मितः। नानेकदिननिर्वर्त्यकथया सम्प्रयो
56 जितः। आसन्ननायकः पात्रैर्युक्तस्त्रिचतुरैस्तथा। दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः। विवाहो भो
जनं शापोत्सर्गौ मृत्युरतं तथा। दन्तच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरं च यत्। शयनाधरपानादि नगराद्यु
परोधनं। स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः। देवीपरिजनादीनाममात्यवणिजामपि। प्रत्यक्ष ५६
चित्रचरितैर्युक्तो भावरसोत्तरैः। अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः। बिन्द्वादयो वक्ष्यन्ते। आ
वश्यकं संध्यावन्दनादि। अङ्कप्रस्तावाद्गर्भान्तरमाह। अङ्कोदरप्रविष्टो यो रंगद्वारामुखादिमान्। अङ्कोऽप
परः स गर्भाङ्कः सबीजः फलवानपि। यथा बालरामायणे रावणं प्रति कंचुकी। श्रवणैः पेयमनेकैर्दृश्यं दी